नं० १००४-घ

भागवतपुराणे रासक्रीडापंचाध्यायी (पुराणम्)

पत्राणि १२३ (सम्पूर्णम्)

सं० १००४ घ

पं॰ वासुदेवजी

सं. १००४ घ

॥ ॥श्रीकृष्णायनमः॥ ॥श्रीशुकबादरायणिरुवाचेति॥ बदरिकाश्रमे महातपश्चरणाद्भगवा
न् श्रीव्यासो बादरायणः तस्य तपःफलरूपः पुत्र इति स एवेह श्रीभगवत्प्रेमरसमयत्वादि
कं ध्वनितं॥ तेनोक्तत्वादस्याख्यानस्य सर्वोपासाधनसाध्यत्वं प्रेमानुरागमयत्वं चाभिप्रेतं
तेनात्र केनचित् छ्रोतव्यमितिभावः। इदानीं श्रीव्रजसुंदरीणां मनोरथपरिपूरणद्वारा प्रेमर
सविस्तारणरूपं तदवतारमुख्यतरप्रयोजनं दर्शयन् तासां सद्विहरणमेव तस्य स
र्वातिशयिसुखमिति चिच्चकरयन्। तत्र चाधरामृतपानादिना सुदृश्यामेव श्रीभगवद्रूपादि
माधुरीविशेषानुभवात् प्रेमविशेषविस्तारसुसिद्धा तद्योग्यता। सकलरासक्रीडायं
च प्राणतुल्यपंचाध्यायावसर्पयन्॥ आदौ तत्सामग्री दर्शयन् तत्र च श्रीव्रजदेवीवर्गा

कर्षणंकथयन् तद्धेतुत्वंश्रीभगवतोलीलाविशेषंश्लोकद्वयमाह भगवनिति। एषाचक्री
डातदुचितकालेकौमारेज्ञेया। तथाचोक्तंग[illegible]पुराणे। सोपिकैशोरकवयोमानयन्
मधुसूदनः। रेमेताभिरमेयात्माक्षपासुक्षपिताहितः इति। श्रीहरिवंशेच। युवती
र्गोपकन्याश्चरात्रौसंकाल्यकालवित्। कैशोरकंमानयानःसहताभिर्मुमोदह इति
तच्चरासारंभेतस्यसौंदर्यादिविशेषस्मारणेनपरममोहनत्वात्श्रीबादरायणिना
ततश्चपौगंडवयःश्रितौव्रजइत्यादिवद्व्यक्तंवक्तुंनशक्यं। क्रीडासाचसमर्थमेव
कौमारंव्याप्येत्यादिकंसद्भिर्ग्रंथयथास्थानेविवरणीयं। तत्रोपलक्षणार्थंकैशोरांत
र्गतमेकरात्रक्रीडेयमुच्यते॥ ॥भगवानपिताराात्रीःशरदोत्फुल्लमल्लिकाःवी

श्री० ४
२

ह्यरंतुंमनश्चक्रेयोगमायामुपाश्रितः॥१॥रासक्रीडायांनिजाशेषकलगवत्तासारत्र
कृष्टनलिष्प्रायेण।नंदादयःपरमानंदनिर्वृताबभूवुः।भगवानपिस्वयंपरमानंद
निर्वृतोपिभावितुंरंतुंक्रीडाविशेषंकर्तुंमनश्चक्रेऐच्छदितिश्लोकस्याभावार्थः।[illegible]
[illegible]ताराात्रीरितिलेर्वंजितार्थमेव।यद्वाताअनिर्वचनीयाःसर्वकाल
तःश्रेष्ठतराःपरमानंदरससमयीरासक्रीडायोग्याइत्यर्थः।वक्तुक्त्वेनानुवक्ष्यासुरा
त्रिष्वेवसाक्रीडाबोध्यते।तज्ज्ञातंसविशेषंवाक्येनाति।शारदाकव्याञ्जेःफुल्ल
विकशितामल्लिकायासुताः।यद्यपिसर्वदाश्रीवृंदावनेसदासर्वपुष्पाणिपु
ष्पवंति।विशेषतस्त्वशरदिजातीकुमुदकमलादीन्यपिविकसंति।तथाप्युत्फुल्ल २

मल्लिका इति रात्रिविषयकविकाशविशेषान्निश्चयेण । एवमग्रेपि कुमुद्वन्तमिति । दृष्टु
द्दीपनानि वीक्ष्य आलोच्य । योगमायापराख्यसच्चिदानंदशक्तिविशेषः । तामुपकर
णत्वेन आश्रितः प्रकटितवान् मनः इति सर्वलीलातो विशेषेण रासक्रीडायाः परमा
नंदविशेषादिस्वरूपत्वमभिप्रेतं । सर्वस्या अपि लीलायाः सच्चिदानंदरूपत्वे प्यागष्टम
ध्यायबाल्यलीलायां विवृतमेवास्ति । यद्वा योगैश्वर्यलक्षणा मायायाः तया । मायादंभे
कृपायां चेति विश्वः । तामुपाश्रितः रासक्रीडायां स्वस्यैश्वर्यरूपं विस्तारितवानित्यर्थः । यद्वा
अपिशब्दः स्ववाचान्वयः । योगः आत्मारामता । माया आवरणात्मिका कापट्यं वा । योगयु
क्तां मायां उपसामीप्येन नित्यमाश्रितोपि इति तद्वानं । [illegible]र्थः ।

श्री॰
3

किंतु निजपदाब्जप्रेमसंपत्तिसाररूपसत्यस्वत्वावाप्यत्वोपारूढ इत्यर्थः। यद्वा योगे संयोग
योगमायायज्ञपत्नी छिववंचना तामुपाश्रितोऽपि इति तदानीं तस्य संगमे मायानिरूहत्वत
र्थः। सर्वाखिलव्रजसुंदरीति: महसा हास्यसंयोगविशेषसिद्धः। सिद्धिं गताखिलरपि
तत्त्वाख्यः। यद्वा युनक्तीति नित्यपक्षेऽपि संयोगं प्राप्नोतीति योगा या मा लक्ष्मीस्तस्यां नि
त्यं वर्तमानः तया सदा सेव्यमानोऽपीत्यर्थः॥ इति रासक्रीडालयानसंपद्येते तद्दुर्लभत्वा
च्चेत्याद्युक्तिप्रेतं। यद्वा। योगा[illegible] मायः शब्दो यस्याः सा योगमाया एवं श्री
मद्भा॰ मानशब्दे चतस्य घ[illegible]निरूपं तामुपाश्रितः। यद्वा योगस्य संयोगस्य मायामानं प
र्याप्तिर्यस्यां सा योगमाया श्रीराधिका। अथवा योगस्य संयोगस्य मा लक्ष्मीः संपत्तिरि ३

रितियावत्तां यातित्राप्नोतीति योगमाया श्रीराधैव तामनस्य उपाश्रितः रासक्रीडाय
सहैतुकर्यात्तन्तपाद्भुतसिद्धमेव एवं निजरिरंसया चंद्रमपि प्राचीदिशा सह प्रियमेव
रंतु मुद्यतं मन्यमानस्य श्रीभगवतो भावमभिव्यंजयन्निव तद्विरसास्मरणेनोद्दित्ता
न्वविधत्व प्राचीदिशा नायिकया सह चंद्रस्य नायकतावत्र्ह्रदयमनिनोद्दयमाह।
।तदोडुराजः ककुभः करैर्मुखं प्राच्याविलिंपन्नरुणेन शंतमैः स चर्षणीना
मुदगाच्छुचो मृजन् प्रियः प्रियाया इव दीर्घदर्शनः ।।२।। यदा मन्मथैके तदा नी
[illegible] उडूनां तारकाणां राजेति तासामपि [illegible] रिंगार [illegible] दयुरिति ध्वनितं ।तासां च
दृष्टिं [illegible] रात्रावल्य प्रकाशता विरह्या परिवारस्यापेक्षया च [illegible] हृदयस्य गोणत्वं [illegible]

श्री ४

विशेषेणालिंगन्निति स्मर्त्तचिंद्गजनिश्चायरौवा। प्रार्गर्द चनस्य [illegible]मास्यां। किंच त[illegible] वि
नाणि तिथ्यंतरे जगौद्रिरंसापेक्षया। शंतमेरमृतमये रित्यर्थः। सर्व्वतापाय हारित्याह।

५

सः कामांवुराशिपरिवर्द्धनलया प्रसिद्धः। न केवलमेवममुना प्राचीदिशएवतापोऽप
हृतः। किंतु सर्व्वेषां जनानामपीत्याह। च[illegible]नामिति। शुचः शरदर्क्कज संतापदुः
खानि। [illegible] श्रीभगवतो रिरंसोद्दीपनद्वारा प्रायो गोपकन्यावर्गे चिरविरहतापा
पनोदनाति [illegible]श्चायरा। जगत्त्रज्यानांतासां शुगपनोदनेन जगतामेव स्वतः शुगपनो
दनसिद्धेः। प्रियः प्रियायाश्चेति सरागत्व साधुत्वं। नन्य वादिनान्येनान्यं रुचिविशे
षो दर्शितः। अत एव शाकाङ्क्ष [illegible]मार्ज्जयन् यथासो परममुखकरेणालिंपति। ह्री

४

र्यद्दर्शनेच्छलेनेन परमौत्कंठ्यं सूचितं । एवं सर्वमिदं श्रीभगवद्रिंसाविर्भावनमुक्तं । ततश्च
भावविशेषाविर्भावेन श्रीगोपीनामाकर्षणार्थं मोहनमंत्रमिव वेणुना किंचित्कालमगायदि
त्याह । दृष्ट्वा कुमुद्वंतमखंडमंडलं रमाननाभं नवकुंकुमारुणं । वनं च तत्कोमलगो
भिरंजितं जगौ कलं वामदृशां मनोहरं ॥ ३ ॥ कुमुत् कुमुदं । तथा च विश्वः । कुमुदपि
कुमुद्धान्यमिति । तद्वंतमिति कुमुदानि चलदलानि विकसितानीत्यर्थः । अत एव वक्ष्य
ते श्रीगोपीभिः वृंदावनं कुमुदकुंदशशांकरम्यमिति । यद्वा कुः पृथ्वी तस्या मुत् हर्षः ।
तद्वंतमिति तदुदयेन सर्वेषामेवानंदादित्यर्थः । तत्र हेतुः अखंडत्वादीनि अखं
डमंडलत्वाद्रमाननाभं इति लक्ष्मीमुखस्मारणेन रिरंसाकिंचिद्विनतेत्यर्थः । यद्वा ।

श्री ४ रमयतीति रमा श्रीराधा । ननु रमाननं सदाकुंकुमाक्तं तया रंजितं चंद्रस्य शुक्ल एव तत्कथं
तस्मात् दृश्यं तत्राह नवेति । एतच्च प्रथमोदयमात्रविवक्षया नवकुंकुमस्यचोद्दीपनत्वे
5 नवप्रयोगः । एवं कालस्य रतियोग्यतां प्रदर्श्य स्थलस्यापि प्रदर्शयति वनं चेति । तस्य
चंद्रस्य कोमलैः प्रथमोदयेनाल्पमात्रप्रकाशवद्भिः गोभिः किरणैः रंजितं रक्तीकृतं
अनुरागविषयीकृतं वा । यद्वा गोभिरिति तृतीयांतं पदं रंजितं त्र हितं । अत्रापि सर्व
वार्थः । एवं च तावदुद्दीपनमेव दर्शितं । कलं मधुरं किंचिद्गीतं । यद्वा कलंयथा स्यात्तथा ज
गौ वेणुनादिति ज्ञेयं । काम्यंगतकलपदामृतवेणुगीतेत्यादि वक्ष्यमाण वाक्यात् । वामाम
नोहरा दृशो नेत्राणि यासां परमसुंदरीणामित्यर्थः । यद्वा वामा कुटिला दृक् दृष्टिर्या ५

सांपरमविदग्धानामित्यर्थः॥ एतद्वस्वरूपनिरूपणभावं॰ व्रजांगनानां सद्यसोमेवस्व
नावतस्तादृशत्वात्॰ मनोहरति आकर्षतिस्वकृतविशेषेणारागतालादिविशेषेणवाम
नोहरंतद्यथास्यात्॰ इतिदिनांतरापेक्षया॰ तदानींगानविशेषात्तिवेतः॰ दिनांतरे
षुवेणुगीतेनतादृशत्वावृत्तेः॥ निशम्यगीतंतदनंगवर्द्धनंव्रजस्त्रियःकृष्णगृ
हीतमानसाः। आजग्मुरन्योन्यमलक्षितोद्यमाः सयत्रकांतोजवलोलकुंडलः
॥ तत्प्रेंद्योत्कप्रकारं श्रीकृष्णवेणूकृतं॰ अनंगंश्रीभगवद्विषयंकामं वाग्वत्तं
मानमेवाधुनावर्द्धयतीतितथोक्तम्। यद्यपिवामदृशांमनोहर[illegible]त्वेननानंग
वर्द्धनत्वमायातमेव॰ तथापीयंविशेषोक्तिसद्दतिमार्यविवक्षया। अनंगशब्दस्य

श्री ४ योगश्च तासां प्रेमरूपकामविशेषेण ग्राम्यधर्मरहितु प्राकृतकामं शान्ताववविवद्धया।
6 यद्वा श्रीभगवद्विषयत्वेनानंगस्यापि संगीतावाद्य त्रिप्रायेणेति दिक्।। व्रजस्य व्रज
वायाः स्त्रियोनवसुवत्साः कृष्णेन परमाकर्षणेन सर्वमेवगृहीतं आकृष्णमावि
ष्कंवा मानसं मनस्सहीयाशेषं वायासांताः।। विशेषतश्चेदानीं तादृशां गीतं श्रुत्वा
आजग्मुः।। यद्वा स्वयूथे मिथः सख्यवतीनामपि तासामन्योन्यमलक्षितो ह्य
मेवहेतुः कृष्णेति। तदानीं कृष्णाकृष्टचित्तत्वेन विचारापगमादिति भावः।
यद्वा तेनैव प्रेमविशेषस्यात्त्वाविकतद्विलासात्मकसापत्न्यस्य स्पृष्टान्तर प्रादु
र्भावात्।। यद्वा गमनेतंतत्वरयातज्ज्ञापनाशंकेः।। अत एव जवेन गमनवेगेन ६

लोलानि कुंडलानि कर्णभूषणानि यासां ताः । आजग्मुरिति श्रीवादरायणेः श्रीकृ
ष्णांतिके सदेवात्मस्थितेः परिस्फूर्त्तेः । किं वातासांतद्गमनवार्त्तया तावद्विशेषाद
येन तासामिव स्वास्यापि गमने स्फूर्त्तिसाक्षादिव श्रीकृष्णांतिकतायाः स्फुर
णात् । यद्वा आजग्मु अन्तिसस्नु रित्यर्थः । यद्वा आसम्यक् सर्वपरित्यागेन जग्मुः
ययुरित्येव कृष्णो वक्ष्यमाणत्वात् स परममोहनवेणुगीतगायकः यद्वा चि
रंत्वतादिनात्तीप्सितः यतः कांतः स्वामी निजमनोहर इति वा । यद्वा कस्य सु
खस्यान्तो निष्ठा यस्मात् सः परममोहनतज्जीतेन निजदेहदेहिकाद्युपेक्षया
आत्मकर्मलोकधर्मादिकं परित्यज्य गताः इति श्लोकत्रयार्थावर्णयत् । तत्रादे

श्रीपं.टी. श्री ८

7

कांसां विरुध जातिकर्मपरित्यागमासादुर्दुहंत्यइतिदुहंत्यो स्नीययुः काश्चिद्दोहं हि
त्वासमुत्सुकाः। पयोधिश्रित्यसंयावमनुद्वास्यापरायययुः। दुहंत्यो गाः दोहं दोहनं कुध
वा तदानीमत्र गोपीनामपि कृष्णाप्त्यै गा दोहनप्रवृत्तेः। यद्वा प्रवृत्तत्वेनैतेनं तं। दोहयंत्य
इत्यर्थः श्रप्तिययुः वेणुगीतानि मुखयमुः काश्चिदित्यादिकं वसुलभ्यप्पन्नदापेक्षया।
वानिताशातयूथपइत्यग्रे वक्ष्यमाणत्वात्। तत्तन्नामग्रहणं गौरवत्तरात्। किंवा
तेषां स्मरणविशेषकत्वेन प्रेमवैकल्पापादनत्वात्। एतच्च श्रीभगवतामृतपूर्व
खंडे विवृतमेव। तथा स्त्रीयानेहतुः समुत्सुकाः कान्ताविलंवसहना समर्थाः एवं स
तुरग्रापेसर्वत्रानुवर्त्यः अपराइत्यस्य पूर्वेणपरेणाप्यन्वयः। एवमग्रेऽपि। अन्य
तैर्व्याख्यातं। यद्वा पयश्चुल्ल्यामाधिश्रित्यसमनुद्वास्य पक्कमपि तत्तानुत्तार्य संयावं

४१ ॥ वयमधीयमहानुद्रास्यामो एवं कासांचित्स्त्रीणां यंतनमुख्यकर्मत्रयपरित्यागमुक्त्वा कासांचिल्लौ-
किकधर्मत्यागं पादत्रयेणाह वदन् तत्रादौ कासांचित्सामान्यबंधुभृत्यादिपरित्यागमाह परीतिया
दिना। परिवेषयंत्यस्ता विहायायंत्यः। शिशून् पयः शुश्रूषंत्यः पतीन् कांश्चिद्दधत्या ऽपास्य भो
जनं परिवेषयंत्यः बंधून् भृत्यादींश्च प्रति अन्नादिकं संविभज्य अर्पयंत्यः ताः ताः तत्परिवे
षणं हित्वायायुरिति पूर्वेणैवान्वयः यद्यप्येतदपि सामान्यं तन्न कृत्यांतरे वसप्रविशति। तथापि
स्त्रीणां भर्तृबंधुभृत्याद्युपेक्षया लौकिकधर्मत्यागांतरे वसुखसंगोऽत्रोक्त इति। अनुपेक्षणमपि
परित्यागं कासांचिदाह आयायंत्य इति पादत्रयेण। आदि इत्यनुवर्तते। शिशून् पुत्रादीन्
हित्वा शुश्रूषंत्यः सुश्रूषमाणाः स्नानाद्यर्थमुदकार्पणादिना सेवमानाः। आसन्नत्यजन्त्य आज
यंत्य इत्यंतर्भूतेनंता। पतीन् भोजयंत्यः भोजनं भोजनं धीतवत्यः वा। एवं पूर्वं धर्मादिपराणाम
पि स्त्रीणां परमसतीनां लौकिकधर्मत्यागं पादत्रयेणामुक्त्वा कासांचित् देहापेक्षात्यागमाह।
अंजंत्य इति पादोपक्रिया लिः। आसन्नत्यानुजानाः। लिपंत्यः चंदनपंकादिना निजदेहमनुल्ले

श्री ४
8

पत्नं कुर्वत्यः शलेपनादिकमपास्यापि तिद्वेयं स्वन्या इत्यस्यापि लिंपंत्य इति पदद्वयेनान्वयः ।
एवं स्नानस्य संस्कारस्यापि त्यागेन देहापेक्षापि सिद्धैव । यद्वा भोजनत्यागेन स्नगवस्त्रीणन
स्य देहस्यापेक्षोक्ता । कासांचित्स्वश्रीकृष्णकस्तेषणार्थं तद्भजनसाधननिजांग भूषणपरित्या
गमप्याह ॥ लिंपंत्यः प्रमृजंत्योन्याः अंजंत्यः काश्च लोचने । व्यत्यस्तवस्त्राभरणाः काश्चित्कृ
ष्णांतिकं ययुः ॥ तत्रैव हेतुं दर्शयन् । किं वक्तव्यं दैहिकदेहाद्यपेक्षा परित्यक्तेति कासांचि
द्देहविस्मृतिरपि जातेत्याह । व्यत्यस्तेति । एवं दोहनादीनामेषामुक्तरूपापेक्षा चेन्न्यथोत्तरं श्रेष्ठ
त्वमुक्तं । यद्वा केवलमत्रास्या निजानिजकर्मपरित्याग एव तात्पर्यं । तत्र च व्यत्यस्तवस्त्राभ
रणा चैव वस्त्रादिधरणारीतित्याग एव । सर्वत्र त्वरा च तत्र हेतुः कृष्णगृहीतमानसा इति समुत्सु
काः इति च प्रोक्तमेव । एवं सर्वा अपि कृष्णस्य परमाकर्षकस्य श्यामसुंदरस्य श्रीव्रजेंद्रनं ८

तावार्य्य

हनसप्यंतिकमेव ययुः। नतु लज्जादिना विघ्नादिना वा दूरे तस्थुरित्यर्थः। परममो
हितत्वात्। यद्यपि स यत्र कांतस्तत्राजग्मुरित्यनेन तदंतिके गमनमेवोक्तं। तथापि
परममोहनत्वातिवेगेनात्यंतनिकटगमनविवक्षया पुनर्विशेषोक्तिरिति दिक्।
अधुना तृतीये प्रबोध्यमानानामपि श्रीभगवदपहृतचित्ततया तासामशेषवि
चारांतर्धानमाह। ता इति वार्यमाणाः पतिभिः पितृभिर्भ्रातृबंधुभिः। गोविंदापहृता
त्मानो न न्यवर्तंत मोहिताः॥८॥ सद्य एव ताः पत्यादिभिर्वार्यमाणा धर्मवद्दर्शना
दिना हस्तधारणादिना च गंतुं निरुध्यमाना अपि न न्यवर्तंत। किंतु ययुरेवेत्यर्थः
कुतः मोहिताः हृतविवेकाः। तत्कुतः। गोविंदेन गोकुलेंद्रेण। यद्वा। गाइंद्रिया

श्री ४ ण्णिर्ईश्वरत्वेन महामोहेनेन प्राणकोटिप्रेष्ठेनांतरेण हृते वाह्यानामन्येषांश्च
५ चतुर्थ्यतासामपर्याप्तत्वात्। अत्र तु वारुवेगनीयमानानौर्यथा तटस्थानां तिष्ठ
ति छत्रपाद्युत्क्षेपणं नावारूढनां वा नौधारस्तेनापि न तिष्ठेदिति दृष्टांतो द्रष्टव्यः
गोविंदेनापहृत आकृष्ट आत्मा जीवा रक्षायस्या मिति निष्कृतो जीवेन विच्छे
दः स्यादिति जीवनार्थं गता इति श्लेषार्थः। तत्रासां पतित्तिरिति तेषां पत्नीत्वश्रु
ताश्रुतत्वागित्वेन मुख्यत्वात् ततश्च केवलं कन्यात्वे गुरोपने दोषस्पर्शात् स्वे
च्छा पित्रादिः ततश्च दुःकीर्तिर्भयात् स्नेहविशेषाच्च त्राष्टतिः। ततः कुलदे
षरांकया वंधुत्तिरिति। रक्षकन्यांपिताविद्यां पतिः पुत्राश्च वा द्विके। अत्रोव ८

ज्ञातयः सर्वानस्वातंत्र्यं कश्चित् स्त्रिय इति स्मृत्युक्ताश्चत्वारो रक्षकाश्चेत्रोक्ताः
ततः प्रायः पुत्रानुत्पन्नेरत्र पुत्रा नोक्ताः । पत्यादीनां चैषां यथोत्तरं न्यूनत्वमू
ह्यं । तासामुक्तेरोत्तरं तत्तद्वश्यतासंबंधयोन्यूनत्वात् । तथापि स्वस्वसंबंधेषां निवारणे
प्रवृत्तावपि परस्परेषां तत्र प्रवृत्तिः । कुटुंबसमुदायतापेक्षया । यद्वा स्वस्वसंबंधैः प
रित्यागकृते परस्पराश्रयत्वाशंकयातैस्तैः क्रमेण निवारणं । यद्वा तत्तदंतिकवर्ति
त्वेः पतिभिः कश्चित् पित्रादिभिश्च कश्चन । तत्र पतिभिः पत्न्य एव पित्रादिभिः
प्रायोऽविवाहिताः स्ववासिन्यश्च पुत्र्य इति विवेचनीयं । अन्यत्समानं । यदि चन
स्यादस्याविघ्नेन वारितास्तत्र विघ्नं तदा सद्य एव दशमीं दशामगमिष्यन्निति ।

श्री ४
10

तासांसर्व्वासामेव भावविशेषंदर्शंस्तेनैव प्रदर्शयन्कासांचिदवस्थाविशेष
माह। अंतर्गृहगताः काश्चिद्गोप्योलब्धविनिर्गमाः। कृष्णंतद्भावनायु
क्तादध्युर्मीलितलोचनाः॥९॥ काश्चिन्नलब्धुंशक्ताः साधनस्थिताव
गृहमध्यस्थिता एव नाममात्रपत्यादिभिः द्वाराद्निरोधात् पित्रादीनांद्वा
रदेशोपवेशनाद्वानलब्धोविशिष्टः श्रीभगवदभिसरणायोगः यद्वात्रन्य
गोपीवर्गीनांपद्धिरणामिवातिशीघ्रमगमनार्थं निर्गमः वहिर्निःसरणं पं
थावा। यद्वा। वेः पक्षिणोपि निर्गमोयस्मात्छिद्रात्तादृशमपियत्र ताः। अ
तएव कृष्णं निजचित्ताकर्षकं परमानंदघनमूर्तिं वादध्युर्विशेषतश्चिंतया १०

मासुः ध्येयमापद्दीत्याद्युक्तन्यायेन तन्मयत्वमापन्ना इत्यर्थः । अत्रोक्तमाप्राप्यायुक्त एव तद्भिन्न
विशेषोत्पन्नः कथं इत्यत आहुः तस्य पत्न्यस्तस्य श्रीकृष्णेन सह विलासस्य किंवा सुगोप्यस्य संगो
गस्य प्रार्थनातया युक्ताः संयुक्ताः योगवत्यो वा सत्यः । किंच मीलितलोचना अर्द्ध
मुद्रितनेत्राः सत्य इत्यर्थः यद्वा दुःखविशेषेण ध्यानविशेषेण वा मुद्रितनेत्राः यद्वा मीलि
तमंतर्हितं लोचनं अन्याशेषज्ञानं यासां तथाभूताः सत्यः ततश्च सद्य एव सद्य एव श्री
कृष्णेन सह संयोगं प्राप्ता इत्याह ॥ दुःसहप्रेष्ठविरहतीव्रतापधुताशुभाः ध्यानप्रा
प्ताच्युताश्लेषनिर्वृत्या क्षीणमंगलाः ॥१०॥ तमेव परमात्मानं जारबुद्ध्यापि संगताः ।
जहुर्गुणमयं देहं सद्यः प्रक्षीणबंधनाः ॥११॥ ध्यानेन विशेषतः स्वरूपगुणादिपरि

श्री
॥

स्फूर्त्याद्युः सहस्रैश्च विरह अत एव तेन तीव्रतापः तेन धुताः मुक्ताः परमात्मानमपि
तं हि कांतं जारबुद्ध्यैव प्रेम्णा निर्विशेषेण सहाजरयंतीति जारः उपपतिस्तद्बुद्ध्या तङ्गा
वेनैव न तु परमात्मबुद्ध्या संगताः सम्यक् प्राप्ताः तेन सह मिलिता इत्यर्थः इति
नित्यपरमप्रेमसंगोपनाय निश्रेतः कथं गुणमयं देहं जहुः किंतु गुणातीतं नित्यभ
गवत्प्रेमसंगतियोग्यं देहं प्रापुरित्यर्थः सच्चिदानंदघनरूपप्राप्त्या संगता इत्यनेन भा
वः संगतिश्च नित्यत्वरूपः स्थलस्थितश्री वक्र महाशंका हि विद्धा नित्यसंयोगलक्षणा महाशक्तिः चिच्छक्तिः २
ज्ञेया तत्रापि जारबुद्ध्या संगतत्वाविशेषः कश्चिद्दृश्यः तथा चोद्धवद्वारा श्रीजग
वदुक्तो यामया क्रीडता रात्र्यां वनेऽस्मिन् व्रजमाश्रिताः अलब्धरासाः कल्याण्यः ११

मापुर्मद्वीर्यं चिंतयेति अत्र च कल्याणा इत्यनेन मद्वीर्य्यं चिंतयेत्यनेन च ब्रह्माप्तिविशे
ष एव लक्षितः। तत्प्राप्त्यर्थं तत्रैव वक्ष्यमाणत्वात्। अन्यत्रैतद्वर्जितमेव। तत्र दुःखशब्देन तीव्रश
ब्देन च अनंतकोटिकल्पेषु महानरकादिजनितोग्रयातनास्वरूपः तेनापि कोटिगुणस्तापः सू
च्यते। तथा अच्युतशब्देन निर्वृतिशब्देन च अनंतकोटिकल्पेषु साम्राज्यस्वाराज्यादि
भोगैर्यत्सुखं मोक्षसुखं च ततोऽधिकमपि तत्सुखं ध्वन्यते। श्रीभगवदास्येष्वसुखम
हाद्येष्वसर्व्वस्वपक्षक्षणमात्ररूपत्वात्। तत्र च श्रीभगवत्संबंधेन तत्तद्भासनाद्द्वयो
पि ज्ञेयः। अत एव त्रक्षीणेति पदशब्दः। तथा श्रुतं नाम भगवन्नित्यसंयोगप्रतिसंबं
धककर्मविशेष एव। मंगलं च मानादिषु श्रीभगवदनुनयादिजन्यसुखविशेषहेतुः

सत्कर्मविशेषः तत्रात्र कृष्णनित्यसंयोगसिद्धेः । अतएव विरहेणमानादिनाच संपद्यमा
नेप्रेमानंदविशेषास्वाभावात् । तासामत्र स्थितानां योऽप्यत्ययः सौभाग्यपन्नितिहृया । अथवा
ततश्चसर्वसद्गुणमयमपि देहं संयोजकः । पत्यादिभिर्गृहांतर्निरुद्धेन तेन श्रीकृष्ण
प्राप्तः तत्तद्योग्यदेहांतरेण तं श्रीव्रजेंद्रकिशोरमेव संगता इत्यर्थः कुतः परमात्म
नं परमप्रियमित्यर्थः तत्र हेतुः जारबुद्ध्येति अन्यसमानं यद्वा ध्यानजनावनसद्यः
प्र[illegible]केषणक्षीणानि बंधनानि पत्यादिकृतद्वारबंधनादीनि यासां तथाभूता अपि
किंच ध्यानेन ध्यानेनवा हेतुना प्रसंगतो योऽच्युतः विरहेऽपि च्युतिरहितो भगवान् श्री
कृष्णस्तस्य । किंवा अच्युतेन अविच्छिन्नेन अर्थात् ध्यानस्यैवाश्लेषेणया निर्वृतिः प १२

रमसुखं आश्लेषरूपा निर्वृतिर्वा तयाध्यानविशेषेणैव साक्षात्संभोगसुखमयत्वेन प्रतीयमा
नया निर्वृत्या विशिष्टा अपि। गुणमयं सर्व्वसद्गुणमयमपि देहं जह्युः तत्र हेतुः दुःसहोयः
प्रेष्ठस्य प्रियतमस्य श्रीकृष्णस्य विरहस्तेन तीव्रतापः अंतर्म्महाज्वरस्तेन धुताः निरस्ताः आशु
शीघ्रं यद्वा आशुः अतिनवान्ताः कौतिर्यासांताः किंच क्षीणमंगलाः अंतर्गृहे निरोधाय
पत्यादिकृतिर्धारणादिना वहिर्न्निःसरणार्थाद्येम स्तित्तिकपाटादिसंसर्गेणावानष्टतिल
कपत्रावल्लीमाल्यादिमंगलाः महोत्तापजर्ज्जरत्वात् कांतिनाशेन तिलकादिद्रव्यमोष
णतादृग्मलिनप्रक्षीणदेहस्य श्रीभगवत्सेवायामयोग्यत्वमननादित्यर्थः यद्वा ध्या
नप्राप्ताच्युताश्लेषनिर्वृत्याप्रक्षीणोंऽशुयमन्त्राप्तंमंगलं सर्व्वाप्तीष्टप्रापकसत्कर्मविशेष

13

फलं यासां तयैवाशेषरतिसुखसिद्धेः ॥ तथाभूता अपि जह्नुः ॥ कुतः दुःसहप्रेष्ठविरह
तीव्रतापेन धुतं धुतिर्निर्धूननं पीडनमितियावत् । तेनैवाशुभममंगलं महादौर्भाग्यं या
सां ताः ॥ क्षणमपि महाकल्पकोट्यधिकं कुर्वाणात्तस्मादसमोर्द्ध्वदुःखतरान्महातीते
रित्यर्थः । यद्वा धुता कंपिता अपगता आशुरविलंबात्ता कालिकी नाघतिर्यासां अतं
तद्विरहतापेन विकारापगमादित्यर्थः ॥ अत एव सद्यः प्रक्षीणबंधनाः सद्यः सपदि प्र
कर्षेण क्षीणं बंधनं आशाबंधो यासां ताः ॥ देहस्वरूपा रासादिकेलिं प्राप्स्याम इत्याशाबं
धोऽपि न स्थित इत्यर्थः ॥ अन्यथा अन्यगोपीवत् श्रीवृंदावने व्रजांतः साक्षादवस्थित्यादिपरि
त्यागायोगात् । अत एव तासां व्रजनिवसंतीनां श्रीव्रजदेवीनां सौभाग्यमधिकमेव । केवलं

१३

नित्यसंगेन विरहदुःखाभावात् केचिद्भावविशेषेरागास्पदाः प्रशस्यते। विरहेपि प्रेम वि
शेषोदयेनानंद विशेषः स्यादिति श्रीभागवतामृते विवृतमेवास्ति। यद्वा जहुः अंतर्धाप्य
मासुः। यद्वा तं परमात्मानं जारबुद्ध्यैव संगं प्राप्तवंत्यः याम्या अपि दुःसह प्रेष्ठविरह
तीव्रतपेनैव धुताशुभाः। धुतं विनाशितं जगतामेव अशुभं तापत्रयं याभिः तादृक्कोपि वि
शेषस्य श्रीभगवदीयगाढप्रेमोद्रेकमयत्वात् जगताम् अशुभनाशकत्वं। तथा ध्यान प्राप्ताच्यु
ताश्लेष निर्वृत्या क्षीणमंगलाः। अक्षीणं पुष्टं वृद्धिमेवगतं जगतां मंगलं याभ्यः तादृग्ध्या
नस्य जगतामत्युदयकारित्वात् मंगलवृद्धिकारित्वं। एवंभूताः सत्यो गुणमयं देहं जहुः। गु
णाभावाः तत्रांतराभावाः आर्यवचोधर्मादिविचारविनिः क्रमोपायाः गुरुजनादि सं
कोचादयः बाह्याः संतप्ता तासां तस्माकदा तादृशाः तन्मयं तत्प्रधानं देहं जहुरिति।

श्री४
१५
तत्र श्रावत्या गणवात्रेदहत्यागतश्च ::यथास्याः षष्ठप्रसंगे ब्राह्मणस्तत्तज्जावत्याग एव देहत्याग
इत्तितृतीयस्कंधे कथितं· अतः क्षीणबंधना: क्षीणानि बंधनानि दिनांतरे श्रीभगवत्के
लिप्राप्तौ प्रतिबंधा आंतरा बाह्या आर्जवसंपत् द्यायासां।तद्वाचो अच्युताश्लेषानिर्वृत्या
कालक्षेपात् लब्धरासा: कल्याणपद्धति एवं ह्यानेनमोहात्तेवल श्री तिक्लिया दिना वैकुं
ठलोकादिप्राप्तिः सख्यत्वमाहिना श्रीभगवद्वशीकरणं तत्र च समर्पेन प्रेमविशेषेण
नित्यप्रहृतया बृजसंयोगश्रुतिसिद्धांतः· ।अतस्माद्दृशज्ञावोत्पत्तये रासक्रीडासर्वथा स
र्द्धैः सेव्येति तात्पर्यं ॥श्रीपरीक्षिदुवाच॥ ॥कृष्णं विदुः परं कांतं न तु ब्रह्मतया मुने।गुणप्र
वाहोपरमस्तासां गुणधियां कथं॥१२॥श्रीशुक: परीक्षिदिति अन्येषां परीक्षणाद्यमिवोवा ७४
चा नेवाद्यनेन संशयइति भाव: ।परं केवलं कांतं प्रियं सुंदरं वा।यद्वा परं कांतं श्रेष्ठं रमणं ज

रमित्यर्थः। अतो गुणेषु स्वसुखादिषु न तत्र धीर्बुद्धिर्यासां तासां गुणप्रवाहः संसारस्तस्यापर
मः निवृत्तिः कथं स्यात्। सर्वज्ञमुकुटमार्यचूडामणिर्भवान् कथं घटेत। तमेव विदित्वा इति मृत्यु
मेतीत्यादिश्रुतिप्रामाण्यात् तत्त्वज्ञानेनैव संसारनिवृत्तिरिति मोक्षस्य संघटनम्। अष्टव मननं
न दोषः स्त्यमानं घेत्य। किं वा मोक्षस्य साधनं शास्त्रे यदुक्तं तदज्ञानवमवद्रूपायं प्रश्नः। यद्वा
परं कांतं कंदर्पकोटिमनोहरं। आत्मकामिष्टं वा अतः रूपगुणेषु तस्य सौंदर्यमाधुर्य
वैदग्ध्यानुरागादिषु न तु स्वस्वरूपे च धीर्यासां। तासां तृणीकृतमोक्षाः सकलोपि सेव्यया
दानां श्रीकृष्णप्रेयसीनां अतिफल्गुतमो मोक्षः कथं संनवेत। इति मोक्षस्यातितुच्छतामा
ननाद्वयं प्रश्नः। मुने हे सर्वज्ञ इति तत्त्वज्ञानाच्च याज्ञायत एव। तत परित्यागस्त्वयैव कर्तुं युज्य
ज्यत इति भावः। किंतु नाथ्यया निस्पृह इति। चयिन्तरस्काकीटोपि कृपया निजजन्मजन्मस्वि
त्यादिवचनैर्भक्तानां तन्त्रोक्तावलात्पर्यायानन्ति इच्छार्यजन्मादिप्रार्थनान्नजन्मादिलक्षणा

श्री३
15

संसारापरमोऽनुचितः अतो निर्दिशादिनाभावपुष्टिहेतुगुणमयदेहत्यागेनगुणातीतदेहस्य
गानप्यनुक्तमेवेति सद्गुणामयतापद्धृगुणधियां गुणज्ञानामित्यर्थः गुणानीश्रीभगवत्संतोष
रूपलावण्यादीनां भवा हीयास्मिन्देहे तस्यापरमः कथंस्यात् श्रीभगवत्सेवायांदेहस्यायोग्य
त्वमननेन असमार्द्र दुःखस्तीत्यावा तासांतादृशदेहत्यागायोगात् यद्वागुणाःश्रीकृष्ण
रूपलावण्यसौरूप्यादिषुरासक्रीडापमदिव्यक्रीडादिषु वाधीर्यासांतासामपिगुणः अ
न्यगायविद्धीवृंदावनव्रजांतःसान्निध्यान्निवासादिलक्षणः रासक्रीडादिलक्षणावासौभाग्य
विशेषःतस्यैवबाहुल्यात्तानित्यन्तनतयावापरंपरा तस्यापरमःकथंस्यात् सद्यःसद्गुण
मयदेहत्यागेनतद्दासिद्धेः किंचक्विचित्प्रायप्रगमात्तान्निरूपयमानस्यापितादृशदेहस्यतादृश
सच्चिदानंदमयरूप २ निजस्वभावेनकथंयातःस्यादित्यर्थः इतिराज्ञः अत्रास्यापिनिर्णयेणापूर्वकं श्रीशुकः शुक
इतिकिंचिदमर्षादिनाऽवक्रवाक्यायाकथनेनशुकतुल्यत्वात् किंतुराजानंस्वाभिप्रायवि
दंजानन्नापितप्रयोजनतत्त्वस्वरूपहेतुकान्काम्यादिरूपकुद्धान्निव इत्याह॥ १५

॥श्रीशुक उवाच॥ उक्तं पुरस्तादेतत्ते चैद्यः सिद्धिं यथा गतः॥ द्विषन्नपि हृषीकेशं किमुता-
धोक्षजप्रियाः॥१३॥ तत्र प्रथमपद्ये भक्तानां संसारोपरमेपि शंकयाः श्रीभगवन्माहात्म्ये
नावदसंभावनोत्पत्तेः क्रोधमुद्रा। हृषीकेशं सर्वेन्द्रियप्रवृत्तिप्रदत्वेन परमोपकारिणमपि।
पद्व। कृष्णो रमणः तद्वृष्टिप्रेमंतो बहुला स्यकेशा यस्य तं परमसुंदरमित्यर्थः। तादृशं अ-
पि कृष्णं द्विषन्नपि चैद्यः शिशुपालः सिद्धिं मुक्तिं गतः प्राप्तः यथा जन एतत्पुरस्तात्पूर्वं स-
प्तमस्कंधे ते तुभ्यं उक्तमेव। शाकटाद्यः शापने शाकटपातसंकटाद्विमुक्तत्पा। स्मा मुनर्हि
न इव वेत्यधोक्षजः। श्रीव्रजेंद्रनंदनः सः प्रियो येषां ते। तस्य वा प्रियाः सिद्धिं यांतीति कि-
मुत वक्तव्यमित्यर्थः। अन्यत्तैर्व्याख्यातमेव। द्वितीयपद्ये चैद्योपि सिद्धिं गुणातीतसच्चिदान-
दविग्रहप्राप्तिलक्षणां न तु विदेहकैवल्यरूपां प्राप्तः। कृष्णप्रियास्तु तादृशीं सिद्धिं यांतीति

श्री४ किमुतवक्तव्यं।अतःप्रेमविशेषोत्सेकवत्त्वात्प्रेष्ठविरहजसोमातिशयाद्गीतास्तासिद्धेन्मादि
16 ध्वंसःस्वीकृतः।यदुक्तं।गुणातीतदेहग्रहणं।भक्तानामप्युक्तं इति।तत्रसदैन्येनाकिंचन्येन
जावितंजावविशेषंसर्वोत्तमयुक्तावरूढ्रोभक्तविशेषेभ्योगुणातीतदेहः।प्रेमविवर्त्तविशेषान्
वान्।आपोनरोचते।श्रीभगवत्प्रेयसीनांतुप्राणप्रेष्ठेनोन्नतमनसांतत्रनातिरुचिरितितत्तीय
पद्मे।हृषीकेशंद्विषन्नपिवेद्यःसिद्धिंनिजात्मीयस्यपूर्व्वंपुनर्भगवत्पार्षदलक्षणंप्राप्तः।हृ
त्यत्रहृषीकेशनामसामान्यस्यश्रीभगवत्स्वरूपस्यवाचकं।अथोहरुजनामतुप्रोक्तनिरूप्य।
विशेषस्यतत्स्वरूपस्य।अतस्तस्यावतारेभ्योवतारिणश्चकामपद्धिकांमाधुरींप्रकटयतः
श्रीव्रजराजकुमारस्यप्रेष्ठाःपरममधुरप्रेमपणालिन्यःसर्वदापथावदन्यव्रजदेव्यहूवव्रजा १६
वस्थानेनश्रीलीलस्यव्रजप्रेमविलासादेःसिद्धिंप्राप्स्यंतीतिकिमुतवक्तव्यं।एतन्नुरूपानंप्र

नर्द्धाननपालहृप्तता। किंवा। भावल्याणं एवदेहत्यागतआव्यं उत्पतामप्यासूचितमपि। नवद्विधैर्नावधारित
मितिसर्वमनवद्यं। अतोहृत्मत्वप्यासुरत्वप्रापकमुनिशापातेवेद्यः श्रीकृष्णप्रत्वेनबद्धहृदेव्यः सिद्धिं
याता इतिकिंवक्तव्यं। यथाकथंचित्संबंधेनापिनिजजनीसंसाधकंभावविशेषं। श्रीभगवंतं एव वा
श्रीभगवत्प्रभावेनसर्वेप्राप्नुवंतीत्याह। नृणांनिःश्रेयसार्थायव्यक्तिर्भगवतोनृप॥ गुणव्यजनस्याप्रमे
यस्यनिर्गुणस्यगुणात्मनः॥१४॥ कामंक्रोधंभयंस्नेहमैक्यंसौहृदमेवच॥ नित्यंहरौविदधतोयांति
तन्मयतांहिते॥१५॥ निःश्रेयसंभक्तिः तदेवार्थः फलं। किंवातस्यार्थः प्रेमातस्मैतत्प्रदानार्थमित्य
र्थः। यद्वा। निःश्रेयसंमुक्तिः तस्यार्थेऽभिव्यक्तिः व्यक्तिः प्राकट्यं। इतिसाक्षाद्भगवत्त्वं एवाभिप्रेतं। अ
नएवभगवतः अवतारिणः परमेश्वरस्य। यद्वा। नृणांनिःश्रेयसार्थायैवेतत्र हेतुः भगवत इति। अ
न्यथाभ्रूविक्षेपमात्रेणब्रह्मांडकोटिसंहारसमर्थस्यपूतनादिकंसादिवधार्थेव्यक्तेरनुपपत्तिरित्यर्थः।

श्री ४ दिनेपेतिप्रयाचरणंक्षेमार्थिएवञ्चतस्ततोलवाद्यदास्यदाप्तागमनमितिभावः॥ भगवल्लएवाह। अव्ययस्येत्यादि

१७ ष्यतुर्न्निर्विशेषोबालेः। आत्मदानादिनापिनव्येतीत्यव्ययः। तस्यकुतः। अप्रमेयस्यअपरिच्छिन्नस्येत्यर्थः। तत्कुतः। नि

र्गुणस्यमायातीतस्य। तत्कुतः। मायागुणानामात्मनः प्रवर्त्तकस्य। यद्वा। नणंनिःश्रेयसार्थायेवव्यक्तिर्गुणि

अन्यथातुकथंचिन्नसंभवेदित्याशयेनाह। अव्ययस्यजन्मादिविकाररहितस्य। किंच। अप्रमेयस्य॥

तादृशस्यापिव्यक्तौहेतुः गुणात्मन इति निजकारुण्याद्यशेषगुणानांवेतयितुःप्रकटपरस्येत्यर्थः॥ आत्म

त्समानं। अथवा। ननु तर्हि किमर्थंपरदाराकर्षणं। तत्राह। अव्ययस्य। परदारविनोदेनापिनकिंचित्तस्य

व्येतीत्यर्थः। ननु तथापितस्यतेनकिंनामप्रयोजनं। तत्राह। अप्रमेयस्य। दुर्वितर्क्यस्यतस्यलीला

केनवितर्कयितुंशक्येत्यर्थः॥ कुतः। निर्गुणस्यगुणात्मनः। निर्गुणोपिस्वरूपः गुणानामात्मा। आ ७

श्रयस्तस्य। निर्गुणत्वात्तद्दोषालेपः। गुणात्मत्वाच्च श्रीगोपीजिनःसहरतिरितिसिद्धांतः॥

यद्वा। ननु तथाप्यमत्वात्कथं स्वरूपं विचार्यैश्वर्यं तामिति वेत्तत्राह। निर्गुणस्यापि जनस्य गुणेनात्मनः अ-
वर्त्तकस्य। यस्य क्रीडया जगतामेव परमं प्रेम सिध्यात् सर्वत्र स्फुरणसंपन्नः। एतदा निष्यक्तिरय यो रासक्रीडोपसं-
हारेणाचिख्यात्येव। अतो हरेर्यथा कथंचित्संबंधमात्रेणापि सर्वचित्ताकर्षके सर्वदोषहरे वा॥ अथ-
र्थ एव शब्दः। कामादिकमपि नित्यं कुर्वतः ते कामादि विधायकाज्ञानाः। यद्वा। कामादिना प्रसिद्धा
दंडकारण्यवासिमुनयः तथा कुब्जादयः। केशिकंसादयश्च। यद्वा। ते तव योऽहरिस्तस्मिन्नित्य-
त्वयः। विदधते इति क्रुवित्याह। हि निश्चितं तन्मयतां ध्यानेन हर्म्यैक निहतं। यद्वा। सारूप्या-
दिप्राप्त्यानत ह्यनूपतां प्राप्नुवंति॥ नित्यमिति तत्र तत्राल्पायासेन निष्कृपात्मयता यामविलंब-
त्वं बोधयति। अन्यथा कदाचित्कुतश्चात्तन्तदावेशाभावेन शीघ्रतन्मयत्वासिद्धिः। सानूप्येव
मक्कानक्रादिनेदेन। सुखविशेषलाभे केवलदुःखध्वंसादिना तथा श्रीवैकुंठपार्षदत्वसिद्धि

श्री४ 18

लोकवर्णसित्यादिना।वैष्णवसिद्धांतानुसारेणानेदःस्यादेवायम्॥नएंगतिःअयमर्थोप्येवंत्यत्रसे
नुमाद।कृपतःकामादिकमपिकुर्वतस्तन्मयतांयांतीति।अन्यत्रमानं।सोऽहदमितिदृष्टांतःवे
तिक्ववित्पाठः।ततश्चवाराहःउपमार्थएव।तथावोक्तंश्रीनारदेन।सप्तमस्कंधे।कामाद्द्वेषाद्भ
यात्स्नेहाद्यथाभक्त्येश्वरे मनः॥आवेश्यतदघंहित्वाबहवस्तद्गतिंगताः॥गोप्यःकामाद्भ
कंसोद्वेषाद्वैद्यादयोनृपाः॥संबंधाद्वृष्णयःस्नेहाद्यूयंनमश्याबयंविभोइति।तत्रगोप्यइति
वद्विद्दिष्टा।केवलमौपपत्यकाममात्रापेक्षया।यद्वातन्मयताप्राप्तिमात्रापेक्षयैवकामादी
नांसर्वेषांएकत्रगणना।फलतस्तुमहान्विशेषएव।एतच्चसर्वंश्रीभागवतामृतेविवृतमेवास्ति
।रसामृतार्णवेचश्रीरूपेणतद्विशेषाभिव्यंजनेनविस्तारितमस्ति।अत्रापिवक्ष्यामस्तथानमग्रेवि १८
वरणीयं।नचैवंविस्मयःकार्योनितरांभगवत्यजे।योगेश्वरेश्वरेकृष्णेयतएतद्विमुच्यते।एवमी

योविस्मयः संदेहः आश्चर्यबुद्धिर्वा पुनर्न तत्कार्यमित्यर्थः। भवतेति। अन्येन किं एतां नाम भवतां तु ग
र्जेदास्य तन्महिमा लिङ्गेन कथंचिदपि कदाचिदपि न कार्य एवेत्यर्थः अत एव गौरवेण भवते
ति भवत्वमेत्युक्तं। विस्मयाकरणे हेतुः भगवति अचिंत्यैश्वर्ययुक्ते ननु तर्हि कथं देवकीगर्भतो
जन्म। तत्राह। अजोऽपि जीववन्न जायते। किंतु स्वेच्छयैव भक्तवात्सल्यादिना स्वयमाविर्भवतीत्यर्थः
ननु तर्हि देवक्यादीनां पुत्रतया कथं ज्ञानमस्तु। तत्राह योगाः दुर्घटसुघटनायां सामर्थ्यवि
शेषस्तस्येश्वरः शिवसनकादयस्तेषामीश्वरे। अतः स्वेच्छया स्वयमाविर्भवस्य देवक्याः पु
त्रत्वमभवदेव। अचिंत्यैश्वर्यवत्वात्तस्य। अत एव कृष्णेन प्राकृति परब्रह्मणि। यद्वा दुर्वित
र्क्यानंतमाहात्म्यामृतसागरतया सुप्रसिद्धे इत्यर्थः। अथवा भगवति परमेश्वरे अतोऽजोऽपि जीवव
न प्राकृतजन्मरहिते। स्वयमाविर्भावात्। अत एव योगेश्वराणां भक्तिनिष्ठानां श्री
योगा

श्री ४ नारदादीनामीश्वरेणानन्यासेव्याभक्तिविशेषप्रकल्पनात्। किंवाप्योगेश्वराणां महदैश्वर्यशक्तिमतामी
१९ श्वरे। निरुपाश्चर्याशेषैश्वर्यप्रकल्पनात्। तत्रापि कृष्णे श्रीगोकुलोत्सवे। यतः कृष्णात् एतच्चराचरा
त्मकं सर्वंकृणात्। अशेषसाधनरहितं अर्पितादिच्छामात्रेण एतदीयपादकिंचित्संबंधाभासमात्रेणापि
स्वपदं एव विशेषेण मुच्यते। श्रीवैकुंठलोकं प्राप्नोतीत्यर्थः। एतच्चूलाविदास्तिनपुरतरुलता
दिश्रीवैकुंठप्राप्त्यभिप्रायेण। तथा च प्रथमस्कंधे। श्रीकुंतीस्तुतौ। इमे जनपदाः स्वृद्धाः सुपक्वौ
षधिवीरुधः। वनाद्रिनद्युदन्वंतो ह्येधंते तव वीक्षिताः॥ इति। अत्र स्पष्टमपुनरेधंत इति अनेन
च वैकुंठप्राप्तिसामग्र्यं वाभिप्रेता। अन्यत्तैर्व्याख्यातं। यद्वा। ननु बहुजन्मयोगयोगादिमहासाध १.
नैर्दुःसाध्यापि तत्प्राप्तिः कथं यथाकथंचित्कामसंबंधेन सिद्ध्येत्। तत्राह। नचेति। अयमर्थः सप्त
व। गोप्यो यथा रासक्रीडायाः श्रवणादौ मुख्यादिपोरपि कामक्रीडामयत्वबुद्ध्या नो दासिव्यं। १८
किंतु सर्वैरवनिमेषलदतीलासिद्धये विशेषलोभत्कैः परमफलत्वेनैव। यद्दासैवात्वेति प्रागेवतत्
४

प्रकरणोत्थापनतात्पर्यं दृष्टव्यमितिदिक्॥ अथवा॥ श्रीव्रजेंद्रव्रजगोपीत्वेन नापविशेषात्॥ अपिकृतवि
घ्नाः सद्यः एव श्रीकृष्णसंगतास्तदानीमेव रासक्रीडामलभंतेति व्याख्येयं। तथाहि। अंतर्गृहगताः
पापैर्वद्धापत्यादिनिर्गमनं तस्थापिताः। अतएव कथं अप्यलब्धविनिर्गमाः तद्भावनायुक्ताः तस्याः
श्रीकृष्णेन सह रासक्रीडायाः भावनायुक्ताः। ततश्च प्रक्षीणबंधनाः ध्यानस्य प्रभावेनैव मुक्त[illegible]
तबंधनाः सत्वगुणमयं पत्यादिनिर्बंधुधावद्धत्वात्। पाशमयं [illegible] देहं जहुः। विशेषणेन ता
त्पर्यं देहस्य पाशमयत्वं जहुरित्यर्थः। ततश्च परमात्मानमपि जारबुध्यैव तं व्रज[illegible] जकिशोररूपमे
व संगताः। यद्वा परमात्मानं पर[illegible]मित्यर्थः। ध्यानप्रभावमाह। ध्यानेनैव दुःसहो यः प्रेष्ठविर
हः तीव्रतापस्तेन धुतं निरस्तं तु क्षीणकृतं अशुभं जगतामशेषदुःखभोगो यस्मात्। तस्मादपि तद्वि
रहदुःखस्याधिक्यात्। किंच। ध्यानलब्धेतोगतं मंगलं जगदशेषसुखभोगोयास्य। तस्मादपि श्री
कृष्णाश्लेषसुखस्याधिक्यात्। अन्यत्समानमेव। ततश्च यामपाक्रीडनायात्राविल्पस्यापमर्थः॥

श्री ४
२०

श्री।

पत्यादिनिर्बंधत्वाद्व्रजस्त्रास्थितापि पश्चान्मधीर्यविंतजामालब्धरसाः नाआम्नायासावन्द्युः। किंतु। आपुः रासमेवेति
श्रीपरीक्षित्य[illegible]स्यापमर्थः। कांतंतु कृष्णं ध्यानेन गुणेषु तत्संगमादिसुखेषु न तु गुणातीतरूपे धीर्यासां इति ध्यानस्य
न्यूनतासूचिता। तथापि पत्यादिनिर्बंधनार्थं प्रयुक्तास्तासां पाशपरंपरायां उपरमः निवृत्तिः कथमिति। श्रीशुकदेवम्प्र
पयाकथं विज्ञानेन संसारबंधादपि विमुक्तिः स्यात्। श्रीकृष्णध्यानमानांतासां न ज्ञानविशेषेण पाशबंधनान्मुक्ति
र्नेति किं वक्तव्यमिति कैमुतिकन्यायेनैव द्वेषादिनाध्यानादप्यभीष्टसिद्धिमाह। उक्तमित्यादिना। अन्यत्सुसंगतमे
व। नाद्भुतंमिति कमायातानां गवान्व्रजयोषितः। अवदद्वदतां श्रेष्ठो वाचः पेशैर्विमोहयन्। ताः वेणुगीताकृष्टाः परम
विह्वलाः व्रजस्य योषितः सर्वा एव नवतरुणीः यथा व्रज एव स्थातुं योग्याः न तु वहिर्वनांतं यगंतुमित्यर्थः। तत्रा
पि विज्ञाधिकमेवायाताः आप्ताः न तु लज्जादिना दूरतः स्थिताः दृष्ट्वा अवदत्। स्वागतमित्यादिवक्ष्यमाणं। किमर्थ
वाचः पेशैर्विलासैर्विशेषेण मोहयन् वित्तं हरन् स्वविषयकत्वावीनितयां वद्धाजितुमित्यर्थः। तत्राग्रे वक्तं
जावि। ननु वाग्विलासमात्रेण कथं मोहनं स्यात्। तत्राह। वदतां चतुर्मुखसरस्वत्युखादीनां वाग्मिनां श्री ২০

व्यासादीनां वाक्कवीनां श्रेष्ठः। कुतः। भगवान् साक्षात् सर्वैश्वर्यपूर्णः। यद्वा वाचः पेशैर्गीर्विशेषैः एकैव वाक् समु
नर्म संप्रार्थना। पेत्यर्थं मपीवेतिमिथोविरोधपुनरुक्त्यादिस्पर्शादेव केतवपरिपाटीपाटवैरित्यर्थः। साक्षाद्धर्मादिबोधनपरत्वेपि
द्यर्थांतरिरंसयातात्पर्येण स्वविषयककनाव दृढीकरणात्। तत्र हेतुः। वदतां श्रेष्ठ इति। यद्वा रंतुंमनश्चक्रे इति श्रु
तौ कल्पं वा महयां मनोहरमित्यादिनात स्यतानिः सह रिरंसा व्यक्तैव। एवं मनस्यन्यदेव। धर्मादिपर वाग्विलासै
श्च वचस्यन्यदेवेत्येवमवहित्थयातासि मोहयन्। वाक्यार्थनिर्द्धारणाशक्तेः। वस्तुतस्तु वाचः पेशैः सौदर्यै
रित्युक्तिपरिपाटीमात्रमेव नतु। ननु ताद्दृशो भावदृतिबोधयत्येव। यद्वा सर्वज्ञां तर्भूलोधियाद्वार्थोऽद्रष्टव्यः। तथा
हि। ब्रजयोषितः सह तिन्नि प्रेमपरा अपि तत्रापि ताः तथा ऋताज्ञा अपि। तत्रापि तदानीं निर्जतिकमाया ना
म्नापि। साक्षाद्दृष्ट्वापि। स्वयं च भगवान् सर्वज्ञत्वेपि नतासां भावानि ज्ञोपि। वाचः पेशैः कपटवाक्यैर्विमोह
यन् परमवैकल्पं प्रापयन्नवदत्। किमर्थं। वदतां नर्मोक्तिचतुराणां मध्ये श्रेष्ठः। नर्मविशेषार्थमित्यर्थः।
यद्वा वाचः पेशैः तासां वाग्विलासैर्हेतुभिः तद्वर्णनार्थमित्यर्थः॥ यद्वा पेशैर्निज सौंदर्यैर्विमोहयन्नवदत्

श्री ४ कृतः। अकारस्य श्लेषेण अवाचः लक्ष्मीपाकिमप्यवदन्तीत्यर्थः॥ अतस्तासां प्रत्युक्तिश्रवणेनेति तात्पर्यं कुला:
वदतां श्रेष्ठः। उक्तिलंगीकृत्यत्वानां स्वत एव परोक्तिचातुरीश्रवणत्वादित्यर्थः। अन्यत्समानं। एवं सर्वथा वस्तु
२१ तो मिथो भाववित् हृद्यमेव रूपं। विदग्धावलिपूर्वासु विदग्धालिशिरोमणेः॥ वाचोर्थलिरवनेमेंताः सवान
मगतेगीतिः॥ अथममवदित्यपौ दासमवलंब्यमानः सादरमाह॥ स्वागतं वो महाभागाः प्रियं किंकरवाणि
वः। ब्रजस्यानामयं कच्चिद्ब्रूतागमनकारणं॥ वो युष्माकं शोभनमागमनं इदं नमित्यर्थः। यद्वा। वो युष्मा
नि सुष्ठु आगतं किं। मत्तो नागोनांपंपतिवल्यादिलक्षणं यासां तासां संबोधनं। अतो वो युष्माकं किं
प्रियं करवाणि। अपितु न किंचित्कर्तुं शक्नोमीत्यर्थः। यद्वा किं करवाणि तदा रूपमपन्नं त्विवत्यर्थः। मत्त
भाग्यानां दर्शनाचरणे न मम पापि धर्मविशेषो भावीति भावः। एतत्सर्वं स्वत एवोदासीन्यं गमयत्येव। लो २१
केषात्मोगौरवेणैवेताश्चाश्चार्यमहदृष्टेः। अत एव पूर्वं पद्रूपतली: अत्यप्यवमेवोक्तं। केवलं तासु ब्राल

णीत्वेनपरमादरादास्यतामिति। आस्तुब्रजांगनात्वेनअङ्कस्यैवदृश्यत्वात्दृश्यंवदतीतिविशेषः। पद्मावः पूर्वं
किंकरवाणीतिसम्भ्रान्तमुखोक्तयातान्येवास्तुपरमौदासीन्यमेवसूच्यते। वस्तुतस्तुएतासांतादृशागम
नं दृष्ट्वापरमप्रीत्यैवाह। स्वागतमित्यादि। महाभागाइतिरासक्रीडायांमहालक्ष्मीतोपिसौभाग्यविशेषा
तिशयेन। किंवासर्वपरित्यागेनलोकापेक्षयातासांमामागमनात्। स्वस्यचतादृशत्वाभावेनस्वस्मादपि
महत्वविवक्षयोक्तं। अन्तस्तासांप्रेमपरवशः सन्नाह। दृष्टामिति। तच्चदृष्ट्वाजनवशीकरणचतुरस्यापिवि
दग्धशिरोमुकुटमणेः स्वाभाविकमेवेतिदिक्। अतएवजनरूपत्नीषुकेषांविशेषः। दृष्ट्वंवदन्विभु
क एवेति। एवंआदौसदाचाररीत्यासमागतजनेषुवक्तुंयोग्यमुक्त्वा। सर्वोप्युगपन्मनसोममागत
वीक्ष्यस्वयमपिकोयंतवेनसन्मयसंभ्रममेवदृष्ट्वेति। ब्रजस्येति। अनामयंमंगलं। कच्चित्त्वस्मन्ने। ननुचतुरसि
रत्नथास्सतिगोपादयोप्यागताः स्युरितिचेत् सत्यं। नहिब्रजांगनाविषयकं केषामपिदैत्यादीनांऽप

श्री ४
22

द्वोत्सन्नं न वेदितिधृत्रीतया आशंकोत्थमाटोपमाह। भूतेति। निर्गमनस्य कारणं हेतुं प्रयोजनं वा। अस्य
वा तदुत्पत्तिं ज्ञात्वा निद्रा रेणलज्जया अस्तु तु रस्तावीद् पशोकवेगेनाभंगलस्याशाव्यत्वेन वा किंचिदवं
तीमित्येव किंचिदन्यदेवास्यापपन्नं सर्वमग्रं पश्यन्नाह कुतो। अद्रस्येति। एवं सर्वमग्रे प्याशंकादिकं कैतवेनै
वेति रूपं। तथाप्यवदंती प्रसन्नमुखीस्थाम्लोकया श्वसना मलिनयन्सलज्जमिवाह। भूतेति॥ य
स्य कृतदुर्हृत्स्यादिनेव मत्वा श्रुत्वरात्रौ प्राप्तः सर्वोऽसामीप्यगमनकारणं मदु विनिर्धूत्वात् स्वरूप
मेव स्वयंपं भूतेत्यर्थः। वस्तु लक्ष्मणं नर्मलनोरेव एकैव वाक् समुपेक्षामपीसंज्ञार्थेनामपीवेत्युक्तं। त
त्र समुपेक्षामपी त्वं जपं चितं। संज्ञार्थेनामपीत्वं कथ्यते। इदमेव श्लेषार्थेनापा अग्रे प्रतिश्लोकं
लेख्यं। तथाहि। नोमहानागाः। महान् नागो नाग्यंपासां। इदृशी इयोजनी। तत्रापीदृशं वनं। तत्रापीद २२
शानुवर्ती जनोप्यमनुकूलः। तत्रापीदृशं वानवयोवनादि। इतिमहद्भाग्यमेव। बोध्युष्माकं स्वागतं॥

अतो युष्माकं प्रियं किंचित् करवाणि। यद्वा वो युष्माभिः कृत्वा निदेशं किंकरवाणि किमपि साधयिष्या

मीति। किंच। युष्माकं आगमनेनैव वृजस्य मंगलं व्यक्तं। अतः आगमनकं युष्माकं आगमनसुखं तदेव। अर

ण्यचारणं प्रस्थलं। मां कश्चित् किंभूतमपास्य लापं किंकरिष्यथेत्यर्थः॥ यद्वा। अव्ययानामनेकार्थत्वात्। के

त्विति किंविद्भूतेत्यर्थः॥ रजन्येषा घोररूपा घोरसत्वनिषेविता॥ प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः॥ १९॥ एषा

प्रत्यक्षा प्रत्यक्षत्वमेवाह। घोरं रूपं स्वरूपं यस्याः सा नामसत्वात्। किंच। घोरैः सत्वैः प्राणिभिः नितरां सेवित

व्याप्ता। अतः प्रतियात निवृत्य गच्छत। नात्र विलंबो युक्त इत्याशयेनाह। नेति। इह वने। किंच। हे सुमध्यमाः सुं

दरीभिः स्त्रीभि[illegible]न्यानके काले स्थानेवस्थातुं न युक्तं एवेति भावः। अन्यत्रैर्व्यंजितमेव। यद्वा ननु रसिकशेखर

भवान् निववजमप्यपविदृक्षुं पुष्पाद्याहर्तुं वा आगता स्म इति चेत्तत्राह। रजनी ति। एषा यदन्येव न तु दिनं। न कुर

चिविविक्तासिनीतत्र कोनामदोषः तत्राह घोरेत्यादि। स्वभावतो भयजनिका। तत्रापि घोरसत्वैर्निषेविता। यद्वा।

श्री ४
23

हे मकरन्दलोचन उपेक्ष्णीयं रात्रिः क्व आदृता । घोरसत्वेति । अतः स्त्रीभिरिह वनेन स्थेयं स्थातुं न योग्यमिति विद्धं
प्रतिपातं । श्लेषेण स्वरूपं स्वरूपं यो वक्ष्योऽत्र तं पुरुषसमूहं स्वस्यपतीनिति यावत् । प्रतिपातनज्ञत । एकाकि
नामयावद्धीनाद्भयावरणस्याशक्यत्वात् । अतोऽत्र न स्थेयमिति । नर्मविशेषः । ननु नीरूपव
रघोरसत्वेनोऽस्माकं न लयं तत्राह । हे सुमध्यमाः हे कृशमध्याः तनुमध्यत्वात् । कृशाङ्गीना
म बलानां वातिकृच्छ्रेण लयं स्यादेवेति भावः । वस्तुतस्तु तन्नासां स्वविषयकत्वावस्पष्टीक
रणार्थं । किंवा नर्मणा उत्कण्ठाविवर्द्धनार्थं श्लेषार्थश्रवणं । घोरसत्वादिना अत्र न कोऽप्या
यास्यतीति भावः । पद्म । एषा उदितसूर्यं वंदारुणानां रूपतीति रूणी अघोररूपान
मोपगमात् । पद्मा । शांता आसन्नस्यृद्ध सात्विकमांगलमासकार्त्तिकसंबंधात् । इतिरास २३
मंडलयोग्यत्वं । किंच न घोरैः रसविघातकत्वेन त्वयजनकैः सत्वैर्दुष्टसत्वादिनिर्द्धि

८

वन्निषेविता।यद्वा।अघोरैर्हृदं दावनस्वजावेनमिथ्यामित्वत्वग्रास्यानयाजनकैरेवसत्वैः सर्वप्राणिभिः।किंवा।अघो
रैः सत्वैर्हरिणमयूरादिभिरेवरातिजनकैः।यद्वाघोरंदुष्टानांभयजनकं।किंवा।अघोरंकेषांचिदपिज
नानांभयाजनकंसत्वंबलंयस्यममेतिवाल्मीकिस्मृत्वासनार्थं।किंवा।अघोरंशांतंसुखदंसत्वंस्वभावोय
स्यतेनमयानिषेविता।इतिनिजवैदग्धीविज्ञापनं।अतःसर्वथाजुष्टंनप्रतियात।इत्यैवंस्थेयं।पुष्पा
णि:कुतःस्त्रीभिःतत्रापिदुःसुमध्यमाःपरमसुंदरीत्वात्मदंतिकएवात्रस्थातुंयुक्ताःपतएवेत्यर्थः
ननुपुरुषसिंहपरमवल्लीपसरत्वं।तिकेस्थितानांतःकुतोनभमितपाशंकयसशंकमाह।
मातरःपितरःपुत्राभ्रातरःपतयस्तथा।विचिन्वंतिस्यपश्यंतोमाहृदयंबंधुसाध्वसं।आदौस्वे
हविशेषान्मातरःततस्तापसांवनेबकुपरिभ्रमणाशंकयास्नेहेनकलंकत्त्वयेनवापितरः।विवा
हितकन्याविषयकापेस्नेहविशेषाभावेनतेषांरैथिल्येसतिपुत्राःपुत्रतुल्याः।मातदोषेण
ज्ञातविशेषाभ्रातरः।मानदुर्विनयसंगोपनार्थंधार्ष्ट्यपरिहारार्थंवा।बाल्येनवकुपरिभ्रमणाश

श्री ४
२५

तथा चातेषां शैथिल्ये भ्रातरः स्वभावतः परमस्निग्धत्वात् तेषामपि लक्ष्मणादिना कथं चिन्तेति यत्नेपतयो विचिन्वंत्येव। पत्नीगुणदो
षत्यागित्वात्। एवमन्वेषणे तेषां पश्चात्तरं शेषुसं। तेन च पतीनामवश्यमागमनमाविभेतं। यद्वा कश्चिन्मातरः कश्चित्पि
तरइत्येवं यथास्तित्वं। किंवा प्रोक्तयुक्त्यैव स्नेहादिना कुत्रापि मातरः कुत्रापि पितर इत्येवं ते सर्वत्र एवापश्यंतः गृहेषु
वनेषु वा अनालोकयंतः विचिन्वंति इतस्ततो मृगयंति इति वितर्के। अतो यदि कदाचित्तेऽत्रागता मत्पार्श्वे युष्मान्
पश्येयुः। तदा युष्माकं मम च बलं ज्ञात्वा पञ्चवस्यादेवेति भावः। अतोऽत्रावास्थित्या निजबंधुभ्यो मम मात्मनश्च साध्वसं
नयं माकृढ्वं। नोत्पादयत। यद्वा। मत्प्रामंत्रा निवृत्ते तत्र सुदुर्गमवनमध्येनागमिष्यंति आगता अपि न जक्ष्यंत्येव। तत्रा
युष्माकमप्राप्या व्याघ्रादित्यो युष्माकमनिष्टशंकया बंधूनां भयशंकां नोत्पादयत। साधवो बंधुवत्सला इति
न्यायात्। अतस्तेषु स्नेहेनाविवर्त्तध्वमिति भावः। यद्वा वो युष्मान्। मा पुनर्मह्यमपि चिंतयेत्यादिवत्। मामात्मनश्च
पश्यंतो युष्मन्मात्रादयो विचिन्वंति। ननु निर्जयसिंहविचिन्वं तु पश्यंतु वा। ततः किमित्यत्राह बंधुभ्याल २४
यं अकृढ्वं। अवश्यकृत्यतापेक्षयातीतनिर्देशः। कुरुतेत्यर्थः। अन्यथा स्त्रीणां स्वातंत्र्यापत्यादयुदोषो

त्यान्निरितिभावः।अथवा।सुखलत्वत्पार्श्वाधिकृतानकुतश्चिदपिविकेनिमइत्याशंक्य।वक्तुंशुद्ध्यएणपूर्वकं मालिन्य
माह।मत्पार्श्वेस्त्रीनिर्निस्छेयं।आबाल्यब्रह्मचारित्वेनममस्त्रीसंगपरिहारादित्यर्थः।अस्तोवतशिवशिव
बालिकानांवृद्धानांवाकथंचित्संगेनदोषोपिकिलनघटेत।एवंचनवयौवनारूढाइत्यादिहेतुमध्य
माहुतिननुमरुकपटपटोगरूढेष्वस्मान्निःसरूसंगोनवतोवकुधानवत्यवेत्याशंक्याहइहेतिाइहनि
र्जनवनेसममेवप्रदोषेइतिदोषविशेषंश्रीमुखनंगीविशेषेणस्त्रयतति।अतोत्रेदानींयुष्मत्संगान्मम
दुःकीर्त्तिरेवगाढंस्यादिति।सर्वथाप्रजातेवेति।ननुसुप्रतिष्ठनकोपिद्रक्ष्यतीतिदुष्कीर्त्तिर्मानिनेषीभ नत्रा
हमातरइति।अतोनूनमत्रगणताद्रक्ष्यत्येवेतिभावः।अतोमद्वंधूनांमद्भूतमंगान्मदुःकीर्त्तिर्विनिपंमा
२२ संपादयत।यद्वावोमात्रेयोयुष्माकंगरूस्पोनिर्गमादिनामत्पार्श्वगमननमाशंकयमामातत्रकुत्रापय
श्यंतोविचिन्वंति।सामीप्येवर्त्तमाना।विचेष्यंतोव।ततस्त्रात्राप्रजातेस्तैर्मयियुष्मान्निमहितेदृष्टेयुष्म

हेतुकमधुःकीर्त्याद्युष्मानूत्प्रातिकुञ्जेभ्योमधुंधुन्योलयंकुरुतेत्यर्थः।अन्यत्समानं।वस्तुतस्तुतेभ्योऽन्यो
न्यापदेनमधूरेस्तुगुच्छस्थानेतानेतुंतथोक्तमितिकिंवा।वाग्भंग्याबंधूनामुपेक्षांलक्ष्योऽलक्ष्यान्तावंवद
25 दयतीति।श्लोकार्थस्त्वयं।एवाधीदि यद्वा:।अंधाइवापश्यंतएवविचिन्वंति।अतोमार्गणेनापिन
संत्येवेत्यर्थः।यद्वाअप्यर्थोदिशब्दः।अपश्यंतोपिविचिन्वंतिकिं।कांक्षानैवेत्यर्थः।नवतीन्निस्ते
षामुपेक्षणान्।अतोबंधुन्योलयंमाकुरुतेति।कुसुममितमित्यादिविशेषणैर्दृश्यतोक्तं।यद्वा।।
ईषत्प्रणयकोपतोवनावलोकनेनदृष्टंवनमित्युक्ते ऊर्ध्वावलोकनेनवराके याकरं[illegible]नमित्यु
क्तेकालिंदीतीरावलोकतोवनावलोकनेनदृष्टं वनमित्युक्ते ऊर्ध्वावलोकनेनवराके याकरं
ज्ञितमित्युक्तेकालिंदीतीरावलोकनेननुयमुनेत्युक्तमितिविवेचनीयं।तत्रयमुनेतिशेषत्वं।लीले २५
तिमांघं।वनस्यकुसुमितत्वेनस्वतएवसौगंध्यमित्यनिलस्यगुणत्रयं।अन्यत्तैर्व्याकृतं।यद्वा।ननुमरु

मोहनवाक्याद्यतिक्रमेणैतेस्माभिरूपेक्षिताएवेतिकुतोजल्पसिचेन्नहिलाहश्राजपत्नेनरत्नावत्राग
मनस्यकिंनामप्रयोजनमितिसकेतवंरूणंध्यात्वा।आंज्ञातं२दिष्टमार पूर्णचंद्राजोरात्रौमदीनश्रीवृं
दावनशोभानिरीक्षणार्थमागतामिति।नवस्तु।तन्नसंपन्नमेवेतिससांत्वनंप्राजिनजेनाह।यद्वागरुवं
धाघपेक्षयाश्रीवृंदावनचंद्रश्रीकालिंदीविहारिलीलांवानुभवितुमागतास्मइतिकुतोनल
मितिचेत्सत्यं।नहिपरमशोभाप्युकृष्टंदावनस्यतत्रोदितचंद्रस्यवतथासुंदरकालिंदी।विहारिवा
२५ नगतिलीलाजाश्चदर्शमिदंदिष्टमासंपन्नमेवेत्यगुल्यादिनादर्शयन्सलीलमाह।दृष्टंवनंकुसु
मितंराकेशकरंजितं।यमुनानिललीलैजत्तरुपल्लवशोभितं।२१।।तथालमाविरंगोल्ष्टशुश्रूषध्वप
तीन्सतीः।।अंदंतिवत्साबालाश्चलानपाजतदुह्यत।।२२।।अर्थःसएव।वस्तुतस्तुसाक्षात्त्वयाला
दृशवनादिजदर्शनेननावमेवविविवर्द्धजति।स्नेहपार्येष्वार्षं।एतत्पद्ये दृष्टमितिद्वाभ्यां।इदंरास
वैगुण्येपुत्रंवनंदृष्टमेव।तत्रस्मात्घोषंमायातेत्यन्वयः।अद्धाएतादृशवनेसाक्षादृष्टे।पितरौरतौविकं

श्री ४
26

वनमभुक्तमेवेति। तथोगपस्तम्भुनातीरेसंश्रयामहइति। तत्तस्माद्धनशोनादर्शने ननिक्रमनोरथपूरणात्। सदोह्वै
गीतदधिमंथनगवादिशब्दैर्घोषयतीति। यद्वासतेइतिशेषेणसर्वेषांसर्वेष्वहस्सुघोषयतीतिघोषस्तंगोपा
वासंयात। माचिरंप्रविशतादित्यर्थः। यद्वात्वविलंबंमाकुरुतेत्यर्थः। किमर्थंपतीन्शुश्रूषध्वंसेवयध्वं। कु
तस्सतीः हे सत्यः। अन्यथासाध्वीत्वंगापत्तिः। अतोमत्पार्श्वेयुष्माकमवस्थानमप्ययुक्तमितिभावः। न
नुपरमसेव्यत्वात्सेवामसरुमानाः सर्वाः सूनावंतोदुःखितास्तेस्माभिःपरित्यक्ताएव। सतीत्वमपित्वत्
वाकूयोनिर्मक्लीकृत्यदूरतःक्षिप्तमित्याशंक्याहसमकरूणांपदकांत। मा अस्तु वत्सादिषुस्वेहेनय
तिक्रंदंतीति। अतस्तान्वालानपाययतदुग्धं। वत्सार्थंवदुह्यतदुग्धदुग्धंगाइत्यर्थः। वत्सस्यावा
लेषुस्नेहविशेषः। तेषांपयस्यात्त्विद्वेषिणः। एवंसर्वत्रनिवर्त्तनार्थंपूर्वपूर्वस्माद्वाक्यादुत्तरोत्तरस्यगरिष्ठत्वं
द्रष्टव्यं। पाययतेत्यस्यपादावुक्तिस्तस्याद्भुतमवश्यकार्यत्वात्। यद्वागोपवधूनांमध्ये। वत्सानुगोपैर्गोपिदादत्ते २६
नपायाययिषांत्यपैवेत्यतआह। बालाश्चेति। तेषांयुष्मान्विनादुग्धपानासंभवात्। यद्वातान्वत्सान्।

वालांस्तु पाययन्तः पयः। कथंतदाह दुह्यता गाः। गोदोहने स्वलएव वत्सानां वालानां च तद्दुग्धस्यैव पानं तात्
त्पर्यः। अत्रेदं तत्त्वं। श्रीकृष्णैकपरात्मा भगवत्पत्न्यो ब्रह्मदेव्यः। कास्त्रिद् जातविवाहा अपि नाममात्रेणैव पति
मत्यो विविधव्याजेन पतीन् वंचयमानास्तैः सह संगाभावेन कुलापत्या एव। केवलं पत्यादीनामाग्र
हेण निजकौतुकविशेषेण वा तास्वेव काश्चित् परपुत्रान् पुत्रबुद्ध्या पालयंति इति। स्वस्तनस्तन्याभावेन तान्
गोदुग्धमेव पाययंतीति। वस्तुतस्तु सर्वमेतन्नर्मणैव। अत एव सतीरिति। श्लोकपार्थस्थाप्यं। तत्रस्मा
इंधु साध्वमापावात। वनशोभातिसामग्रीसद्भावाच्च। अचिरं शीघ्रमापात। यदि आयतद
विलंबेन राज्यं तत एव यास्यथेत्यर्थः। पद्मविरिंचिरंजनः। अस्वातंत्र्यादिदुःखजद त्येन व कुशान् न्यूनतापो
घोषस्तमापात। चकारात् भौगवत्स्यागेऽपि सर्ववत्संबंधः। पतीन् मायुस्कूपधं सती अस्माधीनापि मुखं धर्म श्री ३
सेवध्वं। तत्य पदवीमपि न यातेत्यर्थः। स्वातंत्र्यादिसुखं गंगादितिन्मैवा। वत्सादयो न कं देत्येव। गोपादिभिर्गो
दोहनादिना पयः पानसिद्धेः। अतस्तान्नगाभाजनिष्पयनतु धोकृष्येतत्त्वंकृत्यानावेन स्वातंत्र्यं प्रसृक्षितं॥||

श्री ४
27

अथवामदनिरसनाद्द्वयंपापंजितनाशना:॥ आगतानामुपपन्नानांतत्प्रीत्यंतेममकृतव:।२३।मजिनोनिरसनेद:
प्रीतिविशेष:तस्मादितिमधुरखेमाख्यस्त्रीपुंभावविशेषोनिरस्त:। अतएवसोदासपमादं। क्वियत:स
र्वेपिप्राणिनामपिप्रीतिंकुर्वंतीति।मदनिरसनादितिसाक्षादुक्तमपिनत्वपजति।अतएवगौरवेण
नवत्पद्धति। पद्धा। ननुद्यपंवदप्रवरतरत्येस्माकमनीषंसंपाद्यतां। तत्राह। प्रीतिमेवकुर्वंतीति। प्रीति
शीक्षिविशेषत्वादंगसंगकर्मणोनलमितिभाव:। अन्यत्रैर्वीक्रितं। पद्धा। अतोवलपरित्यक्ता। एवतेषु
नत्वांकिंपुनस्तन्नामग्रहणेनेत्याशंक्यसच्छाधंपदंतस्मात्। अपवेति। अर्थस्तथैव। पद्धा। ममसो
पुष्पास्वनिरसनेहस्तस्मान्नतेनत्यर्थ:। अकापञ्चश्लेषणं। अर्जितोशाप्तांपरमसाधीत्वात्। यद्वा
मद्विषयककामिनीस्नेहेनार्जितापापा:। पातिव्रत्येनपरपुरुषस्नेहविरोधाभावात्। एवमुत्त
पद्यानभावविशेषोनिरस्त:। तथाप्यागतापत्त। अन्यत्समानं। वस्तुतस्त्वेवमौदासीन्यंवानुपंता २७

ग्यासावविवर्द्धनार्थमेवाश्लेषार्थस्यापं। अहो परमानुरक्तास्वपि भवतीषु किमुद्दीपनगर्नैःप्रार्थ
नेरित्याह। अथवेति। अनिशद्धेनस्नेहस्यसम्पर्कोक्यामधुरत्वमेवलक्ष्यते। सामान्यतः सर्वेपि
प्राणिनोममप्रीत्यंते यतः। अतः सर्वान्नमाखुरुंसुदर्प्यो भवत्यो मदनिस्नेहप्रार्थितायाभाव
शीकृतवित्ताः सत्यः। किंवा पत्या दिलयैनास्वक्कं दा अपि मदनिस्नेहपूर्द्धेतोरागलापवत्
तदुपपन्नमेवसर्वतो विशिष्टमद्विषयकप्रीतिमत्वात्। अत एव प्रेमादरेणभवत्यइति
अतोधुनामयासकृत्स्वक्वं दरमध्यमितिनावः॥ भर्तुः शुश्रूषणं स्त्रीणां परो धर्मो ह्यमा
यया॥ तद्बन्धूनां च कल्याण्यः प्रजानां चानुपोषणं॥ शुश्रूषणं धर्मः। स च अमायया सु
द्भावेन। धर्मैकापेक्ष्यायाचेतपरोच्छक्षः इति निश्चितं तद्बन्धूनां श्वश्रूश्वसुरादीनां।

श्री ४
२८

शुश्रूषणं तथा प्रजानां पुत्रभृत्यादीनां अनुपत्यादि शुश्रूषणानन्तरं पोषणं च धर्म एव । अमात्या
चेत्पर एव । चकाराद्वयोरपि मुख्यतया साम्यमपि सूच्यते । कल्याणः क्लेशसाध्यः । तदेवमुष्मा
कमुचितमिति भावः ॥ पश्चात्कुशलादिदृष्टवत्यः । अतो युष्माकमेव तन्न सिध्यतीति भावः । एतच्च
कैतवेन प्रोत्साहनं । पश्चात् तवः श्रीपदं ते नाम । किं वा । आगता पत्नयुक्तमेव । किन्तु परमधर्मेणै
वानुकल्प्यते । नत्वन्यथेति तमेव पिठिकामुद्दिश्यावबोधयन्त्याह । भर्तुरिति । अर्थः स एव वस्तुत
अर्थ्यो योपकाराः स एव । तस्य परमधर्मत्वाभावात् । द्वितीयप

२८

कोऽपि नैव। तुष्टौ कृतचतुर्वर्गश्रवणादिस्तत्किंसाध्यत्वेनैकलत्रस्य तस्य पतिशुश्रूषणवा
त्यधर्मेणालस्यत्वात्। अतस्तस्य धर्मस्य परत्वोक्तिरपि नर्म एवेति। अत एवोक्तं गीतादौ।
सर्वधर्मान्परित्यज्येत्यादिश्लोकार्थश्चायं। कल्याणि हे महाभाग्यव्रजाः। न केवलं तत्तु:
तदुक्तं मद्विधानां च शुश्रूषणमस्तीष्टस्मरणरूपं परो धर्मः। यद्वा। कृष्णादित्योगोष्ठादि
रक्षणासामर्थ्यादहमेवात्र त्वयानां सर्वेषां भर्ता। तस्य किं वक्तव्यं तत्तु र्ममशुश्रूषणमि
ति। मद्बन्धूनां श्रीव्रजेन्द्रबलदेवादीनां च तत् शुश्रूषणं। तथा व्रजानां मत्परिजनमानां
सुबलादीनां व्रजेन्द्रगृहदासीनां वा। अनुपोषणमपि परो धर्मः। अतः शुद्धत्वेन मम
सेवा क्रियतामिति भावः। किंच। श्रीभगवता रसोपयुक्तोऽर्थे प्रयुक्तामपि वाचं वहवाणी

श्री ४ अनुवर्त्तते । तत्रैश्वर्यस्यायमर्थः । स्त्रीणां अन्यासां प्राकृतयोषितामेव धर्मः न सर्वस्त्री
२१ वर्गवरिष्ठानां लक्ष्मीप्रार्थ्यसौभाग्यानां युष्माकं तत्को ऽत्युत्तमानामपि धर्मानादरात् । त
थोक्तं तस्मात्स्वधर्मं चरणं बुद्धं हरे रित्यादिना । एतत्तु हरिभक्तिविलासे एकान्तिल
क्षणादौ वक्तुमो विहृतमेवास्ति । यद्वा । भर्तुर्जगत्कर्तुर्मम । यद्वा । धर्मरहस्यसारसर्वस्वं
शृणुतेति परमार्थमेव नर्मणोवाह । भर्तुरिति त्रिभिः । व्रजस्त्रीणां युष्माकं भर्तुः शुश्रू
षणं स्वधर्मः पापं । अमायया तु परोधर्मः महापापमेव । भक्तिपराणां श्रवणादि भक्ति
रूपस्वधर्मपरित्यागेन पतिसेवनादिपरमधर्मस्यापि महाहानिर्यतापत्तेः । तथा चोक्तं गीता २८
सु । स्वधर्मे निधनं श्रेयः परधर्मो भयावह इति । यद्वा । अकारो विष्णुरहमेव तस्मिन्मयि मायय

याभक्त्याहित्याभगवद्वचनयायद्भक्तुः शुश्रूषणमिति। भगवद्भक्तिहीनानां सर्वकर्मणां
वैफल्याद्वैपरीत्यञ्च। तथाचोक्तं बृहन्नारदीये। किं वेदैः किमु शास्त्रैर्वा किं वा तीर्थनिषेव
णैः। विष्णुभक्तिविहीनानां किं तपोभिः किमध्वरैः॥ स्कान्दे चरेवाखंडे। धर्मात्मव्रतधर्मोपि
हूतानैकोस्त्रवाच्युत। पापं भवति धर्मोपि तवाभक्तैः हृतो हरे इति। एतद्भक्तिविला
से वैष्णवमाहात्म्यादौ प्रसिद्धमेव। ननु परोपदेशा पंडितसर्वथापतयः परित्यक्ता एव।
अधुना किं तदीयशुश्रूषाद्युपदेशेन तत्राह दुःशीलो दुर्भगो वृद्धो जडो रोग्यधनोपि
वा पतिः स्त्रीभिर्न हातव्यो लोकेप्सुभिरपातकी॥ ॥चौर्यादिरतः दुर्भगः भाग्यवि
हीनः निष्फलोद्यम इत्यर्थः। वृद्धो जरातिभूतः। जडः कर्मादिषु सामर्थ्यविहीनः। रोगी

श्री ४
30

महारोगग्रस्तः। अधनः अतिदरिद्रः निर्जोहरजनरणोऽप्यसमर्थ इत्यर्थः। अपिशब्दस्यात्र
त्येकमन्वयः। सः शैल्यादियुक्तोऽपि न हेयः। व्रजवासी तु सर्वसद्गुणयुक्त एवेति कैमुत्य
न्यायः स्यादित्यपिशब्दार्थः। लोके स्तुतिः लोक इयोपन्यासवतीति। अन्यथा इह लोके दुः
कीर्त्यादिकं परत्र च नरकादिकमित्यर्थः। तत्र च महापापरतः परित्याज्य एवेत्याह।
अपातकीति। तथा च स्मृतिः पतिं च पतितं त्यजेदिति। अतो व्रत्यानां सर्वेषामप्यपा
तकित्यान्नहातुं योग्य एवेति भावः। वस्तुतस्तु पश्चात् कदाचित् कृताऽपि धर्मादिविचारस
तिस्तद्विषयकत्वाद्विशेषे शैथिल्यं संभवेदिति। तन्निरसनेन स्वयमेवाह धर्मश्राव
णेन तासां तावादृढीकृत इति। इदमपि सर्वत्र नर्मैव तज्जनापेक्षया सौशील्यादिक। ३०

गुणयुक्तस्यापि पत्युर्हेयत्वात् तन्निरूपितमेव । स्त्रेष्वार्थस्त्वाये । आपद्भ्यः पातीति पतिः रह
हः शील्यादियुक्तोपि सन् । तथाच पातकी धर्मात्पतितोपि सन् । लोकद्वये प्रभुत्तिरपि प
ति पुत्रादीभुक्तिरपि वा । श्रीतिर्व्रजांगनाभिर्युष्मात्तिन्नहिातुयोग्यएव । किंतु । आलिं
गनादिना सहासंगम्यएवेत्यर्थः । अहं तु नतादृशा त्वत्वाम्येव । मद्वन्मगुणत्वेन युष्मदेक
प्रियत्वेन च तद्विपरीतात् । भूयं च मद्वेषरूप्यालोकानेपक्षिकाएव । तदधुनापि कथं न
लिंगयेयेतिभावः । यद्वा । प्राकृतस्यादशाषड्दोषयुक्तोपि पतिर्न्न हेयः । अहं तु लत्व
तः पतिरेव साक्षात् षड्गुणैश्वर्ययुक्तस्य कथं हेयः स्यामिति सर्वत्यागेन भूयमागता
यस्तत्तदुपपन्नमेव । यद्वा । लोके प्रभुर्न्निरेवन ज्ञातव्यः । परमार्थप्रभुत्तिस्तु सोशील्या

श्री ८

31

इत्युक्तोपि अपातक्यपि हातव्यः नत्वल्पस्तु मयि परमानुरागात् दृष्टत्वाल्लोकद्वयमर्या
दातिगा एव त्विति भावः तत्र सिद्धांतो लिखित एव । यद्वा गोप्येत्योऽस्यसूयन्नाह । स्त्रीभि
र्व्रजस्त्रीभिः अपातक्यपि दुःशीलादिरूपः पतिर्न हातव्यो न गंतव्यः पतिः उ हाङू
गताविति तस्य रूपं । दुःशीलः क्रोधनः दुर्भगः कुरूपः वृद्धः जीर्णः जडो मूर्खः रो
गी सदाव्याधियुक्तः अधनो वा दुर्गो धनहीनः । लोकेप्सुभिः महालोककामाभिः ।
ननु श्रीखंडयुवराजत्व हाहाया नैव पतय स्त्याज्याः किंतु सहानामेव तेषां पति
त्वं पतिव्यवहारस्तु च यास्मदेवास्ता मित्याशंक्य तासां हि धर्म्मज्ञ निंदकेन पर
मात्रियमवहिरिच्छयासामसूयामिवाह ।। अस्वर्ग्यमयशस्यं च फल्गु कृच्छ्रं भयाव ३१

हं। जुगुप्सितंचसर्वत्र अपपत्यंकुलस्त्रियः॥ स्वर्गादौ प्रतिकूलं· किंवा स्वर्गमनुरूपा
ऽप्तिस्वर्गनाशकमित्यर्थः। अयिकामिन्यो ऽद्य त्वान्मास्तु स्वर्गापेक्षा· लोकेयशोपे
क्षास्त्वेव· तद्बाधकंचेदमित्याह·। अयशस्यमिति· सर्वसंचितयशसोपिलोपकं। ननु
लोकातीतसुख[illegible]मेव तत् कोनामजानातु· तत्राह· फल्गुतुच्छं· अस्थिरंचाल्पं· ननु
गोप्यच्युतत्वयासहास्माकंतत्सुस्थिरमेव· तत्राह· कृच्छ्रंदुःखसाध्यं। ननु स्वैरि
सिंहव्रजेश्रीवृंदावनेचरच्छंदविहरणात्सुखसाध्यमेव· तत्राह· भयंस्वाम्यादिभ्यो
नरकादिभ्यश्च· तत् आसमन्तात् वहति प्रापयतीतितत्। ननुअस्मत्कोटिनिर्मञ्छनी
यमधुराधरत्वद्रूपरूपया ऽस्माभिः सर्वमप्युपेक्षितमिति कुतोपिनभयं· तत्राह सर्वत्र

श्री०

स्वदेशे परदेशे च। यद्वा व्यवहारे परमार्थे च। जुगुप्सितं निंदितं लज्जाकरत्वात् घृणावह
त्वाच्च। इति निश्चितं। ननु तव देशे कुलजानां सिद्धा जुगुप्सापि सुसह्यैव। तत्राह। कुल
स्त्रियइति जातावेकवचनं। कुलकलंकतस्त्र कुलस्त्रीणां परमानुचितमिति सर्वथा
परिहार्यमेवेति भावः। वस्कालस्तु स्वर्गविनष्ट स्वविषयकत्वावदार्थ्यमेव। श्लेषार्थस्त्वा
यं। अप्यर्थे च कारः। अप्सरसादि रूपमध्योपपेतं कुलस्त्रिया अपि भवत्येव। तराहल्यादी
नाम पितृत्वे वर्णनात्। अतः साधारण्यापत्या दोषविशेषो नास्तीति भावः। किं च। कु
स्यइतितस्यसाक्षात्तत्स्वीकारोपिनास्तीतिव्यंजितं ।तादृशोपिचकाश्चत्प्रेक्ष्यंतरं गोपीनांपरिषदं
सतांप्रासः ।वकुलमंडलाकारेणोपविष्टानां तासांमध्यवर्त्तीसन् ।अनेनापिसर्वविदैश्वर्यमुक्तं ।
किंच ।अर्चितः ताभिः संमानितः आसनकल्पनेनैव ।किंवा गंतांबूलादिसमर्पणपानर्मोक्तिनाकटा
क्षादिनावा ।अत एवत्रैलोक्यातिश्री भगवद्वपुषसर्वदात्रैलोक्यलक्ष्मीपदंचापि[illegible] धुनातः सर्व
कालादर्शिष्यं[illegible] अनेनकाशनप्रकारोपिदर्शितः ।स्वराजयिचैतत्पनुवादः प्रत्यार्थेसभाजनस्य
सम्पर्क विवक्षया किंवापुनर्विशेषेणासमान्यत्पर्थः ।यतः अनंगं शृंगारादि तमपिकामंदीपयतिसं
गीकृतएवतापिस्यकाशयतिइतितथोक्तं ।अत्यंतकंदर्पविवर्द्धनमित्यर्थः ।अतएवतासामेकैकतत
योः तासिस्तनैववान्यतयास्तस्पर्शादि ईक्षया ः अंके ईक्षस्यकिंवाङ्घ्र्योः ईक्षयाश्चेत्यर्थः सम्यकू
स्पर्शनेनविविधपरिचर्याशनैः पाणे ःसुरतसंवाहनेन[illegible] एवमपिसर्वविदैश्वर्यंदर्शितं ।सर्वाभिरपि
द्वयोरंगयोश्चतुर्षावातयोः युगपत्संस्पर्शनात् ।सम्पर्कं सावाधःस्वविशेषार्थेतदुत्तरचारूपंत्व इत्यन्

संक्षेपमागच्छन्नाषिरे। परमवाग्मित्वात्। ततश्च कुपिता इति सर्वदुःखत्रासेः किं वा ते न कपटातिरेकेण
वंचनात्। यद्वा कोपं विना ऽनिष्टायाज्ञानेन हृदय प्रत्युत्तरालक्ष्यत्वादिति। अन्यत्तेर्व्याख्यातं। यद्वा
ताद्दशात्तु वाक्यादनंगदीपनं। किं वा तथैव स्वाजयित्वा। तानि स्वस्य तथा स्वाजनमेव युक्तमि
त्याशयेनाह अनंगेति। उक्तयान्नजेता ऽजेजनस्य इति प्रश्नत्रयं। तच्चाकूतहृत्त्वादिपरिहारेण
पुनः परित्यागाकरणाद्दार्ढ्यार्थं। साधु यथा स्यात्तथा एतद्दूरितं तके। किं वा तेषां फलं। तत्सर्वं विति
चास्मान्न्नति सुबोधं कथयेत्यर्थः। न्नो इति संबोधनेनाव धापयंति तत्र निजदोषपर्यवसानेन तस्य
मनोऽनभिनिवेशात्। स्वार्थः निजदृष्टमात्रफलार्थ एव तस्मिन् वा एकांततः तस्मिन्नेवैकस्मिन् श्रेतो निष्ठा
यस्य तथा तत् तदुद्यमो येषां ते। इति श्रीगुरुसेवामिषा वेष्लवं ज्ञागामादिकं च परिहृतं। अत्र तत्र सद्धर्मा ११९
दि सद्भावात् आमानमेवेति लोकदृष्ट्या परोपकारसंभावितं। धर्मादिकं निरस्य प्रत्युपकारापेक्षैव तज्जनानां

एवंदोषपरिहारापेक्षयाप्यनुपकारेपिधर्माद्यभावः।तथाजैनेतारतम्याभावोस्फुटः।अन्यथाउप
कारअनुपकारयोस्तुल्यत्वाभावे...नानुमजनासिद्धिः।एवमेवानुलङ्घतिक्षापावलनजनानु
सारेणअङ्गीतीतिप्रश्नस्योत्तरंसिद्धेत।अतोप्यत्रअनुपकारापेक्षापि।नतत्रधर्मइतिसूचितं।ति
निश्चये।नान्यथा।उक्तादन्यप्रकारेणेतत्प्रियोलङ्घनंस्यात्।यद्वातत्रात्रमिथ्यात्वंनास्तीत्यर्थः
सख्येनैक्यकथनात्।यद्वा।आत्मनोपितासुताद्यस्यालङ्घनमिवकारूण्यपत्नेरेणभावानः।स्व
ङ्गसख्येननतपरिहरन्संबोधयति।हेसख्य इति।अन्यैर्व्याख्यातं।तदितिपूर्ववदेव।अत
इत्यर्थबलादायात्यन्येव।यद्यपितत्राप्यन्योन्यमुपकारेणदुःखसुखंघटेत।तथापिस्वोपकार
ङ्गनित्वात्।अनुपकारस्यावश्यापेक्षत्वाद्धर्माभावेनतात्विकत्वाभावादपि।विचारेणसु
खाभावाएवपर्यवस्येदिति।नवसुखमितिव्याख्यातं।यद्वा।उन्मत्तवन्नीयतमोऽत्यादिवत्।लेख
कक्रमेणैवतत्।वरूभाणानुसारेणाज्ञानदनपेक्षत्वात्।स्वार्थार्थमितिपाठोपिश्रीवित्तसुखादीनांवहू
नांसंमतः।ततश्चतदङ्गनमन्यार्थप्रतीयमानमपिस्वप्रयोजनार्थमिवेत्यर्थः।अन्यत्स्पष्टं॥ ॥

श्री४ अथ्यास्वार्थमेव ... यैषां कृतानां ते कृते। यथा राजसेवकाः चित्तं दवेन निकादन्तः श्री
प्रसिद्धौ। अत एव प्राप्तो लोकानां सर्वेषामेव दृष्टार्थपरत्वात्। न विशेषस्य स्पष्टं न निर्दिष्टः। अप्र
120 जगतः दैन्यादिनाव्याख्यादिनाच वैप्रसिद्धौ। तथा लिङ्गं तूनं निरुपाधि मरुजकारुण्यमाविर्भूतं।
न हि श्रीनागावलाएव। तच्च सुतरां मतुष्ठतात्मनामित्यत्रैव व्याख्यातमेव। तथापि करुणाः पितरो
चेति द्विविधाप्रवगम्यं लएव। यद्वा। जयेति अन्येषामप्युदाहरणमात्रत्वेनोक्तं। पितरो चेति
चकारेध्याहार्यः। निरपवादः संपूर्णा दृत्पर्थः। नैः अत्युपकाराद्यनपेक्षा केवलमत्यतकृपा
लुत्वेनैवोपकारात्। सौहृदं च निरपवादं। तयोः सहजस्निग्धत्वात्। केवलं सौहृदोक्तिः पु
त्रपालने पित्रोर्दर्शनानुत्पन्नेः। यद्वा। कथं चित्तेनापि तयोर्ग्दर्भेऽपि च्छव्यः। ननस्ववेषां तयो स्व
मलघोति। हे सुमध्यमाः हे सुंदर्य्य इति न देवसौंदर्यमिति। यद्वा। तनतुष्मासुतात्येवतिना
वः कृदंवतासामात्मनज्ञनार्थं चातुर्यं। वैएव। नेवनजंति। किंहेतौ निश्चये वा।। नकृतं नजञ १२०
नंजानंति। अनुसंदधतीत्यकतज्ञाः लोकाद्यपेक्षा वत्वेपि अत्युपकारसामर्थ्यज्ञानेनतद

करणान्भूरवाएवेत्यर्थः। एवंतेषामकृत्वेनानन्दनमनिश्चेतं। सामर्थ्यवंतोऽप्यात्वापियेनलङ्घंतिलेल
तिनिष्ठ्यायाइत्यादाशुर्विति। एवंतासांपर्यदन्नपक्कृतब्रह्मस्यपघन्रयेणडत्युत्तरं। तासांसंक्लृपादि
वाक्यगुणविशेषेणस्वस्मादपिमा। हात्म्यविशेषस्यविस्तारणार्थं। एवंतासामनते श्रीभगवतो
विचित्रक्रीडया। आत्मारामता। आप्तकामताकथंघटतैव। गुरुशब्दप्रयोगेणगुरुधुक्का वनदृश्या। वि
रक्तानिंदित्वेनलक्षणा। सिद्धा। प्रथममपक्कृत्यंचवनसंगच्छेत। ततोक्ततद्धेतवपरिशिष्यतेति। तथा
चाग्रेवक्ष्यते। अक्षतवेताइत्यादि। श्रीविष्णुपुराणे। श्रीबलदेवप्यानेच। अक्षतद्ध्यशोऽह्निसइति
अतएवतेरपिव्याख्यातं। अक्षतद्धत्वंतद्वचनेनैवेति। चरमकोटिगतामितिलआपिचरमकोटि
न४ त्वंघटेतैव। यद्वा। गुरुधुक्कृपदेनपदार्थ्यापिदृश्यात्लक्षणप्येवतेरतिकठिना। इतिव्याख्यातं।
तस्यैवचरमकोटिगतत्वंसुसंगतमेवचतुःश्लोकीसिन्धोपक्रमे। आत्मारामत्वादिवातुविध्यरहितो
प्यत्नलक्ष्ममि। नञःसर्वत्रप्रयोगः। स्ववाक्येनैवस्वस्यपंत्रणापत्यापरमवैष्णवप्रान्तूतेनस
रव्यइति। आत्मा[illegible]मत्वादियाहितमेवसाधितं। अन्यथासख्यासंभवः। ऊंकाविनीतिविचारवि

श्री४ घोषयाहित्यभविप्रेतं। अन्यथा स्वतएवानुष्ठात्रिसिद्धेः न तु अस्माकं त्वय्यनुष्ठात्रिः सदानुवर्त्तत एवेति वि
त्रसत्यं विशेषेणलक्षपत्यर्थमिति सहष्टांतमाह। यथेति। विशेषतो नष्टं इति पुनः [illegible] :प्राप्तिसंर्ववनंति र
121 क्ता अत एव नितरां न तो व्याप्ताः। एवमित्यस्यानुष्ठात्र इत्यनेनान्वयः। हे अवला इति। तत्र स्वतः श
क्यजावंसूवयंति। इत्यं खाद्युत्यन्योन्यप्रियत्वेन ममतिरोधानाघपराधोन ग्राह्य इति भावः। अन्य
त्रैर्व्यारख्यातां सद्धा। एवमित्यस्य मपेत्यनेनान्वयः। नाहं शाविता निन्नेन मयेत्यर्थः। तत्र हेतुः म
दर्थैति। अत एव परोक्षमपि जनं तेव जोमानं। पंथा एवनानुगुणगाथां गाम्यतानाव विशेषं युष्माकं
स्मरतां वे [illegible] लमंतर्ध्यानमात्रेणैव स्फुतमित्यर्थः। अथवा अनुष्ठात्रि हत्रले हेतुत्वं सावकीं हरप
नुष्ठात्रिस्ताः हष्टांतेनाह यथेति। अतो स्पष्टं मेव संबंधः। हे सख्य इत्यनेन हे देव युष्मानधि कृत्य नो
चले। मरुजसख्यादितिव्यं जितमेव गानिवजनाति। एवमिति। हे अपि युष्माकमपि मय्यनुष्ठात्रये
ए युष्मान न जहाभि किं। काह्वा अपि तु नैव। तत्र हेतुः मदर्थैति। यद्वा युष्माकमपि मय्यनुष्ठात्र १२१
ये किं अपि तु नैव। कुतः। एवं ताह्शाविता निन्नजनाभदर्थमेव नान्यत। किं विद्युद्दरपाउकृता
उपकृतालोका श्रुतुद्दरतुवनानि। श्रीवैकुंठादपजस्त्र अप्रतावेदाश्रुत बोधितकर्मानादरात्।

124

अत एव स्वाङ्गस्थपतिपुत्रादयो यासां ताः। स्खलन एव माभि निरंतरविशुद्धपरमानुरागैर्विहीन इत्यर्थः।
एवं मुमुक्षुभ्यो मुक्तेभ्यश्च नक्तेभ्यो व्यासां विशेषो दर्शितः। तेषां तत्तदपेक्षासंभवात्। ता हरि
णावालावान्। ननु तर्हि किमर्थमधुनैवांतर्हितः। तत्राह मय्येति। परोक्षं त्वज्जतेति कुत्रापि मन
नागतमासीत्। किंतु युष्मदंतिके एव वर्त्तमानेन परोक्षं मदगोचरधियानायुष्मात्तिः कृतम
लं विचित्रप्रेमालापादिकं भजता। एतां शांतं गोप्तुमित्यर्थः। एवं कितव जोषितः कस्य उप
त्यादि परिहृतं। यद्वा। अपरोक्षं साक्षादेव भजता तिरोहितं युष्मदहस्पमात्रेण स्थितं। न
न्यापि ह्यप्रकटनं दुःखहेतुत्वेन दोषः स्यादेवेति विनाहि कृतव्यमित्याशयेनाह ह्यभ्यं ह्यप्रा प्रि
यद्धान ननु तदपि किमर्थं। तत्राह ह्यपंस्यप्रा इति। ह्यप्रा जिस रूपस्य पस्यत ह्युक्तमेवेति नावः
। यद्वा। तत परोक्षं जं ह्यपंस्यपस्यतेमा। सहृत्यमत्कौतुकरसेनेत्यर्थः। अप्रहावतदं साधुके
नुकं पतत् ह्यप्रज्ञानजाणेः सहृत्क्रीडनामितिवेतत्राह ह्यप्रा इति। प्रेममालतदपि प्रीतिविघ्नो
पायैव स्यादित्यर्थः। यद्वा। ततलयापि माशाहृदयं निषेधप्रवृत्त्यर्थं गमयति। अप्रहतलमर्थः।

श्री॥ कुतः स्वयं स्वस्याः स्वस्य स्वस्यास्तु तस्याः कर्तुमयुक्तत्वादित्यर्थः। एतद्वा ननु नयनेन वा तु यं।
अन्यत्र तत्र समानं। व इति संबोधमात्रं षष्ठी। युष्मान् प्रतीत्यर्थः। स्वस्य साधुकृत्यं स्वीये
ष्वनुपकारकत्वं न पारये कर्तुं न शक्नोमि। यद्वा। वो युष्माकं मत्स्वीयं असाधारणं
साधुकृत्यं तदहं न पारये। तत्र हेतुः। निरवद्यानिरपेक्षेण सर्वोपाधिराहित्येन निर्मल ऽसर्व
प्रेमविशेषेणत्वन्निर्दोषा संयुक्ताः संयोगः संयग्मार्द्धषयकनाह रागकाममस्यमत्तानेव गु
णाभिप्रेतः। निरवद्यसंयोगहेतुत्वात्। किंच या माभजन्। दुर्जरगेहशृंखलाः अपि गेहशृंखल
लाः गेहात्तानि गेहसंबंधिपतिपुत्रादयस्तत्तत्कर्तव्यकृत्यानि वतान्येव शृंखलाः। इतिना
मपिबंधहेतुत्वात्। ताः संवृश्च्य अनन्य ... । नवत्यकृति प्रेमगौरवेण अतो मम तादृशात
ह्यत्वाभावान्न पारयेत्यर्थः। अन्यत्र नैव पारख्यातं। यद्वा। सुमुक्षु असाधुकृत्यं मद्वि
षयकनेष्कर्ष्यादिकमपि। किमुत साधुकृत्यमित्यर्थः। इदं वृत्ताभिः सह स्वरूपेण १२२
सदा क्रीडतो नेनोक्तं। अप्रतारणे हेतुः। निरवद्यनिर्गुणं गमात्मानं वा संयुज इति समर्प्य

यंतीतितथातासां।किंवादुरंतराःगोरूपस्यदंदस्वलाःनित्यगोपालनादिदुःखकृत्यनिवंधात्सर्ववंधुज
नानुवृत्तिवंधांश्चसंत्यज्यपाल्यवतीरतस्तमात्स्तद्रंनमे वितवान्नस्मि।शंदरवलामितिपाठेपितथैवा ८४५
र्थः।दुरंतरेतिविशेषणेनशंदरवलारूपकेणवानिरस्तानुरूपाप्यच्छेद्यत्वंसंशयत्वेनवगम्यासक्तिकिंचित
त्यागेपिवदितस्त्यागासामर्थ्यं।किंवासंच्छेदनेच्छामपिमत्वाअसामर्थ्यंध्वनितं।युष्मद्रूपात्म
नपेणेनसर्वैनैरपेक्ष्यात्तस्मनेनवप्रत्युपकाराशंकेः।अतएव।येमयथामांप्रपद्यंतेतांस्तथैवभज
म्यहमित्यादिनिजवचनव्यभिचारापत्तेश्चाहं।युष्माकमृणएवेत्यर्थः।इतिसर्वथाप्रत्युप
कारासामर्थ्योक्तिः।अस्त्वेवमृणपकलंकःश्यापंतेश्रीरुक्मिणीमहत्यस्यमेववद्धूति।बधंब्र
तिनंदनामइति।अत्रवप्रतिनंदनेप्यशास्त्राकेवलमृणित्वमेवापादयन्न।अतस्तस्याःस
काशाद्भ्यासांविशेषःप्रसिद्धएवेति।निरूपाद्धिक्षुप्रसादस्यप्रदानेनसदानुगं।पुष्टंविधत्ते
यस्तस्मैश्रीधरस्वामिनेनमः॥इतिश्रीदशमेद्वात्रिंशः॥रासलीलाग्रस्तमेयाजगदेकमनोहरा॥

श्री४ यथाव्रजदेवीनांश्रियोपिमहिमाधिकः।इत्थंईदृशीःभगवतःतादृशवचनादिना
निजाशेषभगवत्तांप्रकटयतः।अतःसुपेशलाःपरममनोहराः।विरहतःभूतोत्ता
123 वीतंजंतापंदाहंजदुः।पूर्वमुक्तस्याप्यस्यात्रपुनरुक्तिः।विरहेप्यपरित्यजनात्।ल
पाविशेषतोनिजभाणित्वाप्रतिपादनेनापुनर्विक्रुदस्यमननाद्वाधुनैवसम्प
क्तापत्यागविवहृना।यतोगोप्यःसकृज्ञेमरसपरिप्लुतविज्ञाइत्यर्थः।किंवाल
दंगेतिआलिंगनकरग्रहणादिनासंपन्नमनोरथाःसत्यः।यद्वाभगवतएवावि
शेषणंसुपेशलवाग्धेनुत्वेनतासांगोपीनांअंगेरूपचिताशिषइति।अतएवरास
क्रीडामारभ्यलक्ष्मीसनंविहापकर्तुंप्रवृत्तः।गोविंदइतिश्रीगोकुलेंद्रत्वात्तत्र
निजाशेषैश्वर्यविशेषप्रकटनेनपरमपुरुषोत्तमता।स्त्रीरत्नैरितितासांचमव १२३
श्रीवर्गाश्रेष्ठताज्ञापिता।इतिरासक्रीडायाःपरमसामग्रीदर्शिता।नामेवप्रत्यस्मिति।

अनुव्रतैस्तदनुकूलैस्तत्सहकलानिधिरित्यर्थः। अत एव व्रीडितैः उल्लासितैः। यद्वा तत्प्रेमजर
विशेषैः। अतोऽनुव्रतैस्तदेकचित्तैः। अत एवान्योन्यमावद्धबाहुभिः। बाहवोऽत्र करकर्पूराः।
अन्यथा नृत्यादिसौंदर्यासंपत्तिः। अन्योन्यत्वं च तासामेव न तु तेन सह। तद्वाकुर्व्याणां तासां
प्रत्येकमुपलक्षतः कंठग्रहणात्। एतच्च रासक्रीडालक्षणं। तथा चोक्तं। नटैर्गृहीतकंठीनामन्यो
न्यात्तकरश्रियां। नर्तकीनां भवेद्रासो मंडलीभूय नर्तनमिति। असमस्मन्मंडलीमध्ये श्रीवा
स्तानचनिः स रात्वितिश्रावकथ्याशहम्गरुडानिआपः। रासः परमरसकदंबमय इति यौगिकार्थः। स
एवोत्सवः क्रीडाविशेषरूपं पर्व सुखविशेषसाधनं सा रससमुच्चयो वा। कृष्णेन परमानंदघनमू
र्त्तिना हेतुना सम्यक्प्रवृत्तः। इति संक्षेपतो रासस्य कर्तृत्वनिर्देशेन प्राधान्योक्त्या सर्वतो वै
शिष्ट्यं सूचयन्। सम्यक्त्वमेव दर्शयति। गोपीनां मंडलेन मंडि— तइति। तद्विशेषश्लोकैः। श्री
परावरेण। रासमंडलिबंधोपि कृष्णसान्निध्यमनुकृता। गोपीजनेनैव नूदेकस्मान् स्फुरात्मना
हस्तेऽग्रसंबंधकं। गोपिकारासमंडली। चकारेतत्करस्पर्शनिमीलितदृशं हरिः। ततः प्रवृ

श्री ४ तेरासस्थलछद्मपातिःस्वतः। अनुपातरासक्रीडायोग्यगीतिरनुक्रमादिति। किंच। तासामिति
तथाचोक्तं श्रीबिल्वमंगलेन। अंगनामंगनामंतरा माधवो माधवं माधवं चांतरे
१२५ णांगनाः। इत्थमाकल्पिते मंडले मध्यगः संजगौ वेणुना देवकीनंदन इति। एतदनुसा
रेण सर्वमध्यमेलीभूतः। शंकुस्थानीय एकोवाद्व्यः। अन्यथा मंडले पार्श्वद्वयस्थगो
पीद्वलकं ठग्रहणेन वेणुधारणासिद्ध्या रासमहोत्सवे परममंगलमधुरमोहनतद
र्शनाभावापत्तिः। तद्वन्निर्धारणेनैव वक्ष्यते। मध्ये मणीनामित्यादि। स्वरूपस्थिति। स्त्रीपुंसत्वपुरु
षस्य तथैव कृत्वं इत्युक्तमिति बोधयति। अन्यथा वैषम्येण दोषापत्तिः सुखजनंग इत्यर्थः
एकस्यैव तथा स्ववशाः सर्वासां च प्रत्येकं युगपत् कंठग्रहणं तथापि तासां स्वनिकटत्व
मानः। तत्र च पार्श्वद्वये वर्तमानस्यापि एकत्वेनैव मानः। तत्संकेतवता तदलं हृतमित्याद्यघशेष १२४
समं रसस्समाधयदा। योगः अचिंत्याद्भुतशक्तिविशेषस्तस्यैश्वर्येणेति। ध्येयकाश

ओकोनिवासोयेषांइतिस्वभावतएवव्योम्निव्योमगतामकस्मात्तास्सक्रीडादर्शनात्संकलत्वत्ता
स्थितानामित्यर्थः।अतएवविमानशतसंकुलंनभोबभूव।यद्वाद्यौःस्वर्गःततस्तत्स्व
र्गेपिताद्दशोत्सवासद्भावः।तेषांस्वस्वसेवावसरोवसरोपिसूचितः।अतएवात्यौत्सु
क्येनेति।इत्यस्मयपेण्यागमनदोषःपरिहृतः।अथवा।एतेखलुश्रीभगवत्क्रीडायाअंत
रंगाःपरिकरादेवविशेषाइतिज्ञेयाः।अतएवोक्तंदिवौकसांतत्क्रीडाप्यकरणत्वेनसदा
सावधानत्वादिसेवर्वर्तमानानामित्यर्थः।एवमन्यत्राप्यूह्यं।ततस्तेभ्योदिवौकोभ्यः
किंवातदनंतरंस्वभमेवनेदुःदिव्यत्वात्।महामंगलोत्सवसूचकत्वाच्च।एवमग्रेपि।अ
दौदुंदुभीनांनादोमंगलादर्शनार्थः।स्वस्ववृपसंमेलनार्थंचनितरांपेतुःनिःशब्देनहृष्ट
वद्दतिवकृत्वेनवरंगसस्थलत्वात्पुष्पाणांस्मरणंकिलउक्तमितिबोध्यते।गंधर्वाणांपतयःश्रे
ष्ठाः।अन्यथातादृशान्तत्याजोप्यगानासिद्धिः।तेषांश्रेष्ठस्यसाफल्यासंपत्तिश्च।स्त्रीनिरप्स

श्री० 125

रात्रिः स्वपत्नीभिर्विलासिनीनामितिसर्वेषामेव तदेकनिष्ठतोक्ता। नातिसूक्ष्मतिमत्वोऽस्मादि
त्यमलं। इतितेषामपि कामादिदोषो निरस्तः। एवं देवकीसुतोस्मव मुक्त्वा रासयोग्यबाधगी
तादिवत्कुमारादेवाद्यमादृ। वल्लवानामिति। किंकिणीनां कांच्या। दिवोन्निनीनां योषितामि
ति योषित्वेन सामान्यतएव वल्लवादिसङ्गो नानु रासार्थी। नूपुराणत्वेन गूढ़ाणादिति। बोध्यते
पूर्वं गृहेभ्यो निर्गमितानां सां तदनपेक्षणात्। सख्यानामितितासां जीवार्थेता ब्रह्मपि वगत
स्पर्शी भगवतापिता वल्लवादिसादृशो निषेतः। रासेन नृत्यमंडलेऽमंडलीबंधः। किंवारस
स्येदं रासं नृत्यमंडलं तस्मिन्। यद्वा रससमूहमित्यर्थः। भगवान् सर्वैश्वर्यदेशोभावान् रसपत्नोपि
तत्र रासमंडलेऽत्यंतं शुशुभे। स्वतोशेषशोभावानमकान्तिगमनस्यापि ताभिः शोभातिशयं
पूर्ववद्दृष्टांतेन साधयति। मध्ये इति। हैमानां हेमनिर्मितानां हेमवर्णानां वा। यथा मरकतम १२५
रकतमणेरपि हैममणिमध्यवर्तित्वेन शोभाधिकास्यात्। तथापि तस्यापि दृष्टय
ऽतनाऽसेवेणेनाधिकशोभानास्यादित्यर्थः॥ तत्र रेमे॥ देवकीसुत इति। प्रेमविकलासार्थं

देवकंयाऽज्ञानत्वात्। ह्यन्यज्ञनविषयकप्रेमभरविस्मारणेनैव यशोदालालसंपत्तेरिति भावः। देवकी
यशोदेति पूर्वोक्तरीत्यैव। अन्यत्तोऽलिखितं। यद्वा। महामरकतकल्पैकत्ववस्तुनोजगद्वतए
कत्वस्य किंवा वेणुवादनार्थमप्रवृत्तिनो निजभावेन। अत्र कोविदाकुः। स्वभावेनेन्द्रनी
लमणिवर्णोप्यसौ नृत्यगतिकौशलेन युगपदिव प्रत्येकं कण्ठग्रहणादिना तासां सर्वा
वस्थाप्रमणात्। तासां सुकेमगौरीणां कान्तिच्छटासंपर्काद्भाति स्म। सा नीलमरकतमणि
वर्णता प्राप्त्या महामरकतकल्पमुक्तमिति। तत्र नृत्यशक्तिविशेष एव न तु कोपि भगव
त्ता विशेष इति। न केवलं ताभिः साधिकं युयुजे किंतु तेन ताश्च युयुजिरे इत्याह। पादेति। पा
दानां न्यासः नृत्यगतिनिर्गम्याक्रमणेऽङ्गपरस्य नुत्तानां हस्तानां विशेषेण धुतिभिः हस्तक
भेदेन चालनैः। यद्य अन्योन्यवक्षवाकुत्वेन नृत्यविधुतयोरन्योन्यसंभवेषु। तथापि अन्योन्य
वक्षान्योन्यासंदृत्यैव वा किं वा। कदाचिन्नमद्भुमावक्त्वपरित्यागेनैव। यद्वा। अन्योन्या
वक्षानामपि नृत्यानां नृत्यगतिभंगैव ताबोद्धव्याः। एवमग्रेपि सर्वं तथैव ज्ञेयमिति। स्मित

३।४ सस्मितैः सुवा विलासैः नतभ्रूभासानिव्यंग्यवनर्मस्वानुरूप्यैः। अनुपमानैः स्वभावतः। कार्श्येन विशे
षतश्चन्तन्व्यार्थपरिखिन्नोदिनान्तयामिव गन्तुं द्रुमध्यमागैः। पदाः नगवदुत्थाने सति पुनः परिग
126 हीतानि निकुञ्जनिकुञ्जान्तरीयाण्येव। कृष्णस्य श्यामसुंदरस्य वक्षः तदा श्रियालिङ्गितौ गौराङ्ग्यस्तदेका
ग्र्यपादस्पर्शः। तत्स्वदृष्टान्तेनापि व्यंजितमेव। किं वा कृष्णस्य वक्षः स्वयाः इति तत्सदृशालतत्र द्वैप
गव्यादिकं तत्र प्रेममोदितत्वं वपुः कृष्णमेवेति भावः॥ अतस्तमेवगाजंत्यः तत्प्रकारश्च श्लोकः।
श्रीपराशरेण। कृष्णः शरच्चन्द्रमसं कौमुदीकुमुदाकरं॥ जगौ गोपीजनस्त्वेकं कृष्णनाम
पुनः पुनरिति। विशेषेण रेजुः प्रशोभितं। तत्प्रेमनर्मयोग्यप्यो रन्योन्यं संविलनेन तस्य प्र
र्मलौकिकत्वयोरैक्येनैव शोभाजालसंपन्नः तडित्पुवेति दृष्टान्तेनान्योन्यशोभाजातस्यापि ये।
नाधानितैव। चक्रुः इति नृत्यगतिकौशलेन निरुपाधिविशेषेणैव वा नानात्वमिव प्राप्तत्वा
त्। किंवा मेघानां घटा विविधरूपा। अन्यथा सुश्यामत्वा जावेघ शोभाघ भावः। तस्या १२६
स्त्रि शोभानंतरं नासामतिशोभावर्णेन सर्वथापरम शोभाजाचरम काष्ठागतानामपि रासक्री

ड्याश्शेनाविशेषसंपत्त्यापरमाद्भुतत्वात्। नतस्य ब्रह्मषोडिकेणेतासां नृत्यगीतविहारैः। किं वा नृत्य
स्य आधारस्य तत्कागानस्यापाद्ध्रुवैरिति। नृत्यमाना इति नर्तनेपिताद्दशागानामकौशलं वि
शेषो दर्शितः। गानादिप्रयोजनमाह। रतिसुरतं प्रेम वा। किं वा श्रीकृष्णप्रेमसेवषु या तासां। न
वोद्धैर्गानादिना तासां श्रमः शंकनीय इत्याह। कृष्णस्य विभ्राजकषकस्य परमानंदघनमूर्त्तेर्वा
अभिमर्शनमुदिता इति गीतस्योद्धैस्त्वं दर्शयति। यासां येन वा गीतेन। आवृतं व्याप्तं। यद्वा। अ
स्य गीतादेर्गीतेन लोकनिबद्धगाथ्यादिना आवृतं। तदेकरसमयमभूदित्यर्थः। इति तन्माह
त्म्यमुक्तं। अन्यत्रैर्व्याख्यातं। यद्वा। नृत्येन मानः श्रीकृष्णेन संमानः। यद्वा। नृत्येन मानः स्त्र
[illegible]ध्याधि केचन गर्वो यासां ताः। रक्तकंठा प्रेमास्निग्धकंठ्यः। इति गानस्य प्रेमरसमयत्वेन
परममधुरत्वमुक्तं। उद्धैः गाने हेतुः। रतीति कृष्णेति वा। यद्वा। उद्धैः श्रीकृष्णादप्युच्चतया। तथा
चोक्तं श्रीपराशरेण। रासगेयं जगौ कृष्णो यावत्तारायतध्वनिः। साधु कृष्णेति कृष्णेति तावत्ता

श्री४

१२७

छिगुणं श्रुयुरिति। तत्र हेतुमाह। रक्तेत्यादिविशेषणैस्त्रिभिः। एषां मध्ये षड्हेतुर्हेतुमत्वं ह्येयं।
।यद्यपि तासामभिमर्शतस्तस्य विमोदास्तथैवेंद्रियैर्गीतं संभवेत। तथापि रासक्रीडायां पद्म
यातज्जुह्वगीतश्रवणेनालसेन वा। ननु तादृक्कामिस्त्रोदिति। अधुना पूर्ववक्तासु मुख्यानां
मवेष्टितानि हस्यत्केनाह। काचिदितिसार्द्धपंचभिः। मुकुंदेन परमानंदाभेदेन समामिति
ताहशोन्नयनेहेतुः। तथा तेन तस्य जगतोपि परमानंदप्रदलब्धानि। उन्नितम्बमूर्च्छेपाम
स। यद्वा अपूर्वाः कल्पयामासा। आमिश्रिताः ततस्तेन मुकुंदेन पूजितातेन समामुन्नय
नापि आमिश्रितत्वे नोन्नयनात्। कथं पूजितातदाह सा ध्वनि। वीप्सा हर्षसाधुत्वपदर्श
पदं वदतेतिशेषः। अन्यत्रैवं व्याख्यातं। यद्वा। आमिश्रिताः विशुद्धाः। तथा च संगीतसारे
ज्ञातव्यो श्रायथाओकारास्तासां लक्षणमुच्यते। शुद्धाः सुर्ह्मीतयः सप्ततः षड्जादिस्वरा
निधाः॥ ताएवाविकृताःस्वस्थो ज्ञाता विकृतस्वरूपा॥ इत्यादि किंच। षड्जापर्ज्जनीवगांधा १२७

ट

रीमध्यमा पंचमीतया ॥ धैवती चाध्यनेषादीयुद्धा एतास्तु जातय इति । कापिचिदित्यनुवर्त्ति-
तएव । चकृपथा स्याल । इति पूर्वतोप्यस्याः समानाधिकं । तेन च गानेपि कौशलमाधिक्यं सू-
चितं । पार्श्वस्थस्येति श्रीघ्रसुरवगरूणं बोधितं । अन्यथा रासावेशेन स्खलनं संभवेत् । किं-
च । पार्श्वस्थत्वेन । तस्यापितत्र स्यावधानत्वं तस्यां पूर्वतोपि नाधाधिक्यं सूचितं । अतः
परिश्रमादिकं तदर्थं केवलं छलमेवेति रूपं । रासश्रमेण कदाचिद्घष्टिमेकालीलया
छलमिवावष्टभ्य विलन्नीतिगदाजुत । पद्य । गदति वर्णात्मकं शब्दं निगदती गदा वंशीतां वि-
भार्त्तिगदाभृत वंशीधरः तस्य । सवीकरं परित्यज्य तस्य स्कंधं जग्राह । परिश्रांतिलक्षणं अन्य
थास्यदिति । तथा श्रीपराशरेणाप्युक्तं । परिवर्त्तश्रमेणैकाचलद्वलयलापिनी । ददौ बाहुल-
तां स्कंधे गोपी मधुनिघातिन इति । मल्लिकापुष्पाणां म्लक्षणंकु वराघोद्धवां । एका गोपी
अंसगतं स्कंधस्थितं स्वनावतप चोत्पलपुष्पतोप्यधिकं सौरभ्यं यस्य विशेषतश्चचंदने

श्री ४ नज्ञासम्यक्रूपालिकेछेदादिसाधुप्रकारेणलिखितं। इतिभावोद्दीपनत्वंसूचितं। रूपस्पर्शं। श्रुं
128 वनेहेतुःरूपस्परोमेति। प्रमवेचरूपादित्यर्थः। श्लेषेणरोमाण्यपिहृष्टानि। तस्याश्चस्पर्शे
किंवक्तव्यमित्यर्थः। षष्ठीचतुर्थ्यांस्वर्गाड श्रीकृष्णगोडे। नाघेतेश्रमव्याजेनसंदधत्याइ
तिभावः। प्रकर्षेणसंमुखत्वाभावेपितन्मुखप्रवेशनादिचातुर्येणादात्त। नृत्यती। न
र्तयंतीत्यनेका। गायतीगायंतीचापरा। स्तौतिस्म स्वपे। कृताइतितन्नृत्यगानेवपरमावे
शंबोधयति। पार्श्वस्थस्यअच्युतस्यनिश्चयेननत्यापार्श्वएवास्थितस्यभगवतोहस्त
एवअच्युतापहारित्वादिनातत्। श्रांतासतीश्रमनिवृत्त्यर्थमिवेत्यर्थः। एतच्च
पूर्वमुक्तमेव। शिवंस्वतःसुखरूपं। एवंसुखाःसप्तोक्ता। ॥ अष्टमीत्र। काचित्प्र
रिलसद्बाहुंपरिरभ्यचुचुंबतं। गोपीगीतस्तुतिव्याजनिपुणामधुसूदन। मितिश्रीप १२८
राशरेणोक्ताअष्टेषा। पक्षा। नृत्यतीमाघ्यतीत्यकैव। एवंषट्। देवमंडलमध्यवर्तिनः। पार्श्व

योस्तितेश्रीराधाललितेनोक्ते।आयात्रमंडलस्यै।वोल्कायात्।यद्वापूर्वव्याख्यानुसारेणसैवेवोक्ताद्वि
या:श्रीराधाद्वैकातस्यमंडलमध्यवर्त्तिन:।सर्व्वपार्श्वस्थात्रनोक्तेति।अच्युतंकस्माच्चिदपि
रूपगुणादिमाहात्म्याच्युतिरहितंसुस्थिरंवा।कांतंरमणंलब्ध्वा।तस्यदुर्ल्लभतलाभाद्व:।श्रियएकां
तेनएकांनिष्ठयावल्लभं।यद्वाश्रिय:कांतं।आत्मनश्चैकांतवल्लभंलब्ध्वा।इतिश्रियोपिसकाशात्ता
सांमाहात्म्यमभिप्रेतं।तद्दर्शयति।गृहीतेति।तथाचगास्यतेश्रीमदुद्धवेन।नायंश्रियोंऽग
उनितांतरते:प्रसाद:स्वर्योषितांनलिनगंधरुचांकुतोन्या:।रासोत्सवेस्यभुजदंडगृहीतकंठ
लब्धाशिषांयउदगाद्व्रजवल्लवीनामित्यादि।कर्मेतितासांरासेनपरमाशोत्तोक्ता।यद्वा।परिश्रां
ति:सूचिता।तथापितत्रहेतुमाह।भगवतानिजाशेषैश्वर्य्यसारसर्व्वस्वंप्रकटय्य।तासममितित
साहित्यस्यपरममोहनत्वात्।यतोगोप्य:तदेकप्रेमपरवशाइत्यर्थ:।तेनसममित्यनेनतासांत
मदृशवैदग्ध्यादिकमपिव्यंजितं।तथातासामिवतस्यापिक[illegible]त्यलादिकंसर्व्वंबोध्यते।अन्यत्ते

श्री४ व्याख्यातं पात्रवादके ष्वितिदुंदुभिनादालिरायणाकिंनरादिष्वितिचदिवौकसामित्युक्तोसहंलगतिच
संभावनयति।अथ उक्तंश्रोतोप्यधिकमाहात्म्यमेवदर्शयति।किंवा।हंर्षगंधर्वपति
128 गानादिकमुक्तं।अधुना रासरंजनेरणतासांकका चिदन्यलगीतायैपेहत्पारुकस्मीति।अपि:
सएव।परिष्वंग:गोपीनामाश्लेष:करात्तिमर्ष:तासामेवकरालुजनं।यद्वास्वकरेणतासामति
मर्षः स्तनादिस्पर्शनं।स्निग्धेक्षणंतन्मुखादीनांसरसावलोकनं।उद्दाम विलास:नीवीश्लथना
दि:।हासश्चनोवोद्रेक विलासितस्मितं।रमायाईशा:स्वामी।इतिस्वामिचेनतस्या।ताद्दशरत्ययोग्य
ता।व्रजसुंदरीभिरितितासामेवतद्योग्यताभिप्रे ता।लक्ष्मीतापितावैदग्धीविशेषात् तमेव
दर्शयितु श्रीभगवतस्तासांचमिथ:साम्यंदृष्टांतेनाहयथे ति यथात्रतिविंबेन
सहार्भकस्यक्रीडा।पिवैशादर्शपनाभितथानाभि:कृष्णस्येत्यर्थ:।अनेनश्रीभगवद्भतरपिशाभ्यास् १२८
चिता।वैषम्पतदर्पत्तरिति।तथानासामिमिलस्यापिप्रेमविकाराद्दूय:।स्वचान्क:श्रीपराशरण।

गोपीकपोलसंश्लेषमभिपत्य हरेस्तुजो पुलकोद्गमसस्यायेस्त्वदंबुघनतां गता वितिः। अन्ये ते
र्व्याख्यातं। यद्वा अत्रतिविंवेन विभ्रमो विलासो यस्य स बालको यथा तद्वत् निष्ठः सन् अन्यत् किम
प्यजानन्नरमत तथायमपि। यद्वा एवमुक्तप्रकारेण व्रजसुंदरीभिर्यत्परिष्वंगादयस्तैस्तानि
रवसह रेमे सोपि तादृशान्नेव परिष्वंगादीनकरोदिति तद्दृष्टांतेनाह। यथेति। अन्यत्समानं॥
ततश्च तासामत्यंतानंदमजनीत्याह। तदंगेति। तस्यांगे संगः आलिंगनादिना मिलनं अंगसं
गः। आकुलेंद्रियचलत्वणमाह। केशानित्यादिना। दुकूलं परिधानं कौशेयवस्त्रं। कुचपट्टि
कां उत्तरीयं। उत्तरीयं तस्यैव सूक्ष्मवस्त्रं वा। तद्द्वयमेव वा। व्रजस्त्रिय इति प्रेमभरविवशतया
तादृशत्वं तासामुपपन्नतमेवेति भावः। एवं तासामानंदाधिक्यं सिद्धमेव। अत एव प्रशब्दः। लब्ध
व१ नवला कुंद्मत इत्यारायनसंबोधयति हे कुरूद्वहेति कस्य परमानंदघनमूर्तेः जगच्चित्ता

श्री०
कर्षकस्यवाविशेषेणापूर्वस्फूर्तितोऽसाधारणेनक्रीडितंक्रीडांविशेषतःसाक्षात्सेवादिद्वाराप्री
त्याईक्षित्वाकृष्णस्यैवेननतद्विक्रीडितस्यासिताद्ध्यात्मेवाभिप्रेतं।खेचरादेवादयःतेषांस्त्रियः
१३० सर्वाश्चापि कामेन श्रीभगवद्विषयकेणार्दिताः पीडिताः सत्यः विशेषेण सर्वविस्मरणादिना अनु
स्यन् श्रीकृष्णस्यासौ निजयोगपत्र्या योगपत्र्यादिविचारराहित्येन विकला अभवन्। नवमीं दशां प्रापु
र्घोरशंकइतिपाठेनसहितइत्यर्थः विस्मितानूनं। अदृष्टपूर्वत्वात्। अन्यत्तैर्व्याख्यातं। तत्रातिदी
र्घास्थितिचिरकालस्थैर्यं स्वच्छन्दकुलसुखक्रीडानां यथानिर्बंधाल्पकालेन निर्वाहासिद्धिः अतए
वाग्रेवक्ष्यमाणस्य ब्रह्मरात्रइत्यस्यार्थं ब्रह्मणश्चतुर्युगसहस्रपरिमितायां रात्रौ गतायामिति
केचिद्व्याचक्षते तदपिसंगतं वेदकलगवच्छन्दस्यायाशेषविरुद्धस्य समाधानात्। रात्रिष्विति वक्ष्य १३०
वंचता रात्रीरित्युक्तस्यानियाहरितिवक्ष्यमाणस्यचानुसारेणेति। अथवादेवानां देवीनां च स

र्वेषामेव व्यामयानानां विमोहमाह। खेचराः तत्स्त्रियश्च। गणशब्देन तत्पत्न्यः परास्तत्तारकाः चकारा
सापि सगणः कामार्दितो बभूवुरित्यर्थः। अनेन नक्षत्रमाणरतोलज्जादिनासंकोचो निरस्तः।
सर्वेषामेव विमोहनात्। तत्र यथोकस्य कामांगवद्विषयकभाव विशेषलक्षणः। एवं रासक्रीड
याः श्रीकृष्णविषयकभावविशेषवर्द्धनेन परममोहनत्वं दर्शितं। प्रकृतेप्येतन्न त्यागीतो दः श्रीभग
वद्भाववर्द्धनत्वात्। तत्रापि तस्यमाहात्म्यात्श्रीभगवत्कर्तृकत्वात्। तत्रापि तालिः सह। तत्रापि संपन्ना
नि: परमयोग्यपात्रिर्व्रजसुंदरीभिरेव सुसिद्धः। तद्योग्यत्वाने श्रीव्रजेंद्रकिशोरस्यानन्यनागपरस्याय
न्त्रसंपादनमिति। अतएवांस्तं सर्वमुक्तं तत्र गाविंदः श्रीरत्नेरिति। परमफलमाह। त्रैलोक्यं
कयेव। इत्येकस्यापि शक्तिविशेषेणानानायसत्पता पि सिद्धैव गोपयोषितः गोप इत्यर्थः। तत
श्चका श्चिद्विवाहिताः काश्चित्कन्याश्चेति। यद्वा गोपानां योषितो नार्याः। तत्रश्च काश्चिदेषां पत्न्य

श्री ४

१३१

एव। कासि दुखकाल्यायिनी व्रताल्लगवन्निष्ठा अजातविवाहा अपि कथं चिद्भगवन्मायादिना
सेद्धविवाहमननाद्भार्यात्वेन प्रतीता इति ज्ञेयं। एतच्च श्रीरूपेण लिखितेल ललितमाधवना
टकादौ व्यक्तमेव। लीलया शृंगाररसखेलया। विचित्रैः सौरतचेष्टया वा ररामरमे भगवानि
ति लक्ष्यते भगवल्लासारसर्वस्वप्रकटनमिति भावः। तस्यैव प्रेमरसपरिपाकविलासविशेषा
त्मकत्वात्। तथा जगच्चित्ताकर्षकत्वात् तेनैव स्वतः प्रेमविशेषविस्तारणाच्चेति। तच्चाग्रे व्यक्तं
भावि। श्रीभागवतामृते विवृतमेव। आत्मारामोपीत्युक्तार्थमेव तद्भ्रमणं च पृथक् पृथक्
तत्रैव निकटकुंजादिषु किं वा रासस्थल्यामेव तत्तद्दलदिति तत्रैव न। एवं च हृद्विश्वैश्वर्य्यमाधुर्यं
द्रष्टव्यं। रतिः सुरतं सैव विहारस्थान। इति तत्र रसिकता सूचिता। यद्वा रतौ विहारः विविध १३१
विदग्धचेष्टा तनयः विदग्धशिरोमणिः परमप्रीतावाश्रीकृष्णः। अंतमे नपरमसुखात्म

केनपाणिना। प्रकर्षेणाश्रमजन्यप्रस्वेदबिंदुपसरणालकसंवरणादिनोज्ज्वलयामास। यतः
करुणः कृपालुः। नचकेवलमभ्यजनेष्विवकारुण्येननकिंतुपरमप्रियत्वेनेत्याह। प्रेम्णेति
इतिकारुण्यविशेषोक्तिः ततः। अंतमेनेतिस्पर्शमात्रेणापिस्वकात्वतः परमसुखकरत्वं। तत्रच
प्रमार्जनं तत्रापिकारुण्येन तत्रापिप्रेम्णेति परमसंतोषणमुक्तं। अंगेति प्रेमसंबोध
ने। एवमेकस्यकेनैवपाणिनासर्व्वासांयुगपद्वदनप्रमार्जनादैश्वर्यमलौकिकत्वंच
सर्व्वविन्मधुरत्नगवत्त्वासारप्रकटनं। एवमन्यत्रापि। ततः प्रहृष्टानिजदेहादिनात्रिधातस्य
प्रहर्षंसंजनयामासुरित्याह गोप्यइति। तत्रस्फुरद्दीप्तिसौंदर्यया। सुधितेतित्तावेन। जगुरि
तिसंकीर्त्तनेन। ऋषभस्यपुरुषश्रेष्ठस्य। इतितस्यपरमवैदग्ध्यादिकमुक्तं। तासामपि
सिद्धमेव [illegible] एवतस्यमानंदधत्यः। उक्तप्रकारैः संमार्जनंकुर्व्वत्यः। यद्वा। अहोऽस्मद्धन्य

श्री॰ चमित्येतादृश[illegible]स्य गर्धमपर्यंतप्यः। सूक्ष्मत्वात् तत्कृतानामपि श्रेष्ठत्वं सूचितं। तदेव दर्शयति।
132 पु[illegible]ण्यानि साक्षात्सुरतपरूपाणि सुखात्मकानि वा ऽगुणः। तत्र हेतुः। तस्य करुरुहैः स्पर्शात् गा
नेतदानीमेव तेन क्रियमाणात्। किं वाऽसर्वकृतान्। यद्वा। सुखमार्जने गंडेषु जातान्। तत्र दृष्टो
मोहयामासांता इति रत्यादि परिश्रांतानामपि गानेश्रमाभावो रसपुष्टिशेषश्च बोधितः। ततः पर
महृष्टस्य श्रीभगवतोऽपि श्रमं च स्मितमाह। [illegible] त्रिरिति त्रिलिः। श्रमं तासामात्मनश्चापोहितुं
अपनेतुं तत्र च सात्त्विकानंदघनमूर्ते क्रीडायामावेशेन परमेव दृग्ध्याहि सूचनार्थं प्रत्येहक
णिकाहिना सौंदर्यं च दर्शनार्थं च श्रमः संनाव्यस्त आगसंगेत्यनेन पद्मिनीस्त्रीवर्ग इत्यपा
दानांतासामंगतः स्वानविकामाहसंचारात्रिमेतः। किं च स्वकुचेति। अतएवानद्भुतः। स्रक्कुको १३२
हीशिया कुंदस्रजः कुलपतेरिति हेर्घोक्तिः। परमसुगंधेन कुंकुमरंजितत्वसंपत्तः। स्रक्षुवं
वंधित्वेन तदानीमलीनां तत्र स्थितियोग्यता। तत्रागंधर्वपतिसदृशता तत्र तेषामेव गीतिश्च बोधिता

एवंजलक्रायांकामोद्दीपनसामग्रीचदर्शिता।सःपरमविनोदी।वार्यामुनंआविवेश।आरान्नृप।
श्रावितान्।दृष्टांतोगजेंद्रस्यवक्र।लिर्गजी।भिःसहजलविहारसन्त्याद्यनुसारेण।अन्यत्तेव्याख्या
तं।यद्वा।गंधर्वपागायनश्रेष्ठाः।गंधर्वाधिपगजेंद्रस्यज्ञायनेखेचरपिवेतिविस्तृः।तच्चतत्रअलयस्ख
तेः।इतिजलक्रीडायोगपमुत्तमगीतमुक्तं।यद्वाकान्तिःश्रीभगवदंगसंगेनघृष्टस्रजायाः।याश्च
निजकुचकुंकुमेनरंजितारत्यावेशनसर्वांगेषुसंघृष्टन्ताः।ताभिः।अतएवतासांश्रमापनेतुं
नकेवलंतासामेवस्वस्यापिप्रीतयाहृष्टांतइति।जलक्रीडामाहुसइतिपरमकौतुकी।अंजसिजल
मध्येइतस्ततःसर्वदिक्षुअलमतिशयेनपरितःसर्वांगेषुसिच्यमानोऽन्तसेवस्वयंस्वातंत्र्येण
रेमे।यद्वास्वयमपितथैवताःसिंचन्नित्यर्थः।युवतिभिरितिरसमत्तत्वंतादृशसेकसामर्थ्यंचद
र्शितं।प्रहसतीभिःप्रकर्षेणापरिहसंतीभिःनर्मस्पुकेनतस्यत्तंगवितर्क्षणवा।तस्यतुतनप्र

श्री४
133

मेव विरुद्धमित्याशयेनाह । अत्रैमणाश्रमरस्येन न उद्धितः सिक्तः । अन्यत्पाठांतरे ऽत्रैमणार्द्धितोद्ध
ष्टः । अंगेतिप्रकर्षसंबोधने । वैमानिकैः विमानेन व्योम्नि चरद्भिर्देवादिकैर्जनैः सेवरिवतनु क्री
डापरिकररूपैः कुसुमवर्षिभिः परमानंदेन हृष्टचित्तैः कल्पपुष्पाणि क्षिपद्भिः सद्भिरीड्यमानः
साधु साध्विति । यद्वा तत्स्पर्शं गंवितर्क्य वल्लभः डार्थमिव जयजयेत्येवं स्तूयमानः । ततश्चैवैमानि
केरितिपुंस्कन पुरुषैरेव स्त्रीणां विमोहादिना तत्राशक्तेः । किं वातासां त्वं ब्रजदेवीपद्मपातित्वेन
कुसुमवर्षादावप्रवृत्तेः । अतः स्वयमित्यस्यात्रैवैवान्वयः । सत्वयमेकमेवतैः स्तूयमानः । स्त्र
योर्व्याख्यातं । यद्वा स्वेषु निजजनेषु वरतिः रागो यस्य सः । अतः स्वस्य जयादपि तासां जयेन सं
तोष इति भावः । यद्वा ननु श्रीगुरो । कृपया तज्जलक्रीडां विस्तार्य वर्णयेति चेत्तत्राह स्वाप्रसा
धारणीरतिः जलाद्विक्रीडायस्य सः । अतो दृष्टां तां धनो वनसा विस्तरेणावर्णयितुं न शक्यते । १३२

इत्यर्थः । एवमत्रोत्तवक्ष्यमाणात् । तथा श्रीहरिवंशोदिताच्च द्वारिकाजलविहाराद्यत्र विशेषः सूचितः ।
गजेंद्रस्य लीलेव लीला यस्य । स्पर्द्धोक्तिः प्रायमेव । यद्वा तादृशजलसेके पि गजेंद्रस्य वसुखत्वरवि
वक्षयायं दृष्टांतः । तत्र जलक्रीडानंतरमिति जलक्रीडया पुष्पमालादेर्म्लानत्वाद्दिना पुष्पाव
चयादिकौतुकार्थमित्यर्थः । चर्यं चकारेति नोपक्रमे । जलप्रसूनानि कमलादीनि । स्थलप्रसून
नि जातीकुंदादीनि । तत्कुंधसंवंधेन । निलस्य सौरभ्यं शैत्यं च जुष्टमिति मांद्यं च सूचितं । चचार पु
ष्पावचयं निकुंजान्निलीनतयेति विचित्रप्रकारेण क्रीडन्नित्यस्तेतावत्राम भृंगगणानुवृत्त्वं
पुष्पावचयेन तत्साहित्येनैवागमनात् । किंवा जलक्रीडायोगरागापगमेन सहजमधुरसौ
रभ्यप्रकाशात् । किंवा तेषां नोवा द्दीपनस्वभाववत्त्वेन सदा स्वीकारात् । किंवा श्रीमुखवनमालाद्या
मोहनसदाकृष्टत्वात् । अतएव तेषां सुकृतोक्तिः । मदचुरिति भृंगगणानुवृतत्वे हेतुता । तथा हि

श्री४ रहस्येष्वेतत्काममत्तताच । सर्वत्रायं दृष्टांतः प्रायो मत्तगजेंद्रस्यकाधिकतायाः । यथास्य गजीभिः
सहस्वातंत्र्येण क्रीडायां मिथः प्रीतेश्चापह्नुयतीति । अन्येत्वर्थोः स्वातं । यद्वा संगवक्रार्यतः । क्रीडल
134 लाः या अमदा वासां गणेना ह्लद्यति तेषां प्रेमममत्तताक्ता । अतएव अभेदमुक्तं । एवं तत्रापि क्ल
तरासक्रीडामुक्त्वा तस्यामनुक्तमन्यमपि विलासं संगृह्णन् । तथा वकुलरात्रहतायामपि त
स्यां तामतिहृशान्नुपसंहरति सर्वमिति । उक्तप्रकारेणाति तद्वात्राची दृशी परापि क्रीडा ।
साक्षात्तं तद्विस्तीर्णं चाङ्गसमर्थयितुं न शक्यतः क्तिाव । तथा निशाइतिवक्त्र्येन तत्र च सर्वा इ
तिसाकल्येन संपूर्णकैशोरं सर्वास्वेव रात्रिषु रासक्रीडा बोध्यते । श्रीपराशरेणापि तदुक्तमेव ।
सो पि कैशोरकवय इति । तत्र कौमारं पंचमाब्दांतं पौगंडं दशमावधि । कैशोरमापंचदशाद्यौ
वनं तु ततःपरमित्यादिवचनादेकादश्या अष्टमास्यां पंचदश्याब्दपर्यंतं गोकुलेत्र नित्यं साक्रीडा ह्य १३४

या । यच्चान्ते श्रीमदुद्धवेन तृतीयस्कंधे । एकादशसमास्तत्र गूढार्चिः सबलोऽवसदिति । तच्च कौमार
पौगंडयोस्तद्वयोगपवयसो रासक्रीडानुदयेन भगवत्ताविशेषप्राकट्याभावाद्गुप्तैश्वर्यत्वाभि
प्रायेण । अत एवाग्रे गूढार्चिरिति । अत एव रंगस्थले पितरौ प्रति श्रीभगवतैव वक्ष्यते । नास्मत्तो
युवयोस्तातेत्यादि । यच्च मधुपुरीप्रवेशवक्ष्यमाणस्य प्रगल्भलीलाहसितावलोकनैरित्यादेर
नुसारेण कैशोरे यौवने पि श्रीभगवतो गोकुलक्रीडामन्यते । तच्च नातीव संगतं । कैशोरे पि
तस्यैव दग्धी विशेषणा प्रगल्भलीलाया संभवात् । अन्यथा किशोरश्यामलश्वेता वित्यक्रूर
दृष्टेः । तथा किशोरौ नातियौवनाविति पुरनायुक्तेश्च विरोधः स्यादिति । किंच एवमित्यनेन नै
शरात्रिक्रीडाया दृष्टौ अन्यरात्रिक्रीडापि तादृश्येवेति सूच्यते । ततश्च सर्वे रासक्रीडांते मिथो
वाकोवाक्यस्य समाधानं लिखितमेवेति । शशांकः सर्पश्चिंद्रः सतश्चि नैवशाशस्य सम्यगुदयात्

भि

श्री० तस्यांसुविविशेषेणराजितादिनवलप्रकाशिताः।एवंश्रीभगवद्रासक्रीडार्थंतासुरात्रिषुचं
द्र॰ह्लादिमायामिवह्र्षमंडलएवागच्छेदितिज्ञेयं।यच्चोक्तंवैशंपायनेन।एवंसकृष्णोगो
१३५ पीनांचक्रवालैरलंकृतः।शारदीषुसचंद्रासुनिशासुमुमुदेसुखीति।तत्रचशारदीत्युपल
क्षणं।किंवाशारदीष्विवेतिज्ञेयं।यद्वामधुपुरीमध्येश्रीवसुदेवकृतपुत्रपरिवर्तनादिवत्
कल्पनेदव्यवस्थयाभेदःकल्प्यः।ननुनित्यमेवतादृशरात्रौतादृशप्रकारादिनाकथंसा
क्रीडासिद्धात्राहसत्यकामइति।ननुतथापिमानादिनापत्यादिपारवश्यादिनावासदातं
नस्यादुर्लभनामन्ये।तत्राह।ननुनिरंतरंरतोऽनुरक्तः।सर्वथापावकुत्रबंधेनसर्वापिस्यावा
सैवद्धाऽबलानांतदेकाधीनगोपीनांगणोयस्मिन्निति।तासामनुरतत्वेनसामरस्यंयत्रकु १३५
त्रापिप्रियतदायनेकेनापिप्रकारेणसिध्येदेवक्रीडावः।तत्रचास्यान्यावनानास्तीत्याह।सः म

हामोहनेरासरसिक इति । नचकदाचिकेनापि हेतुना तत्र रतिः स्यादित्याह । अदकाडं स्वीकृतं
सौरतं सुरतसम्बन्धि [illegible]लीलाविलासोद्रेको वा येन सः । तदर्थमिव श्लाकघ्यादित्यर्थः । तज्ज्ञात्म
न्येवेति । नकेवलं स्वयमौदासीन्येन । ताएवरमयामास । किंतु स्वस्मिन् साक्षात्तत्स्वीकारेण
परमासक्त्या स्वयमप्यनुकूलतवानित्यर्थः । यद्वा । आत्मनिनिमित्ते इत्यात्मारामत्वाद्युप
हृया तस्यापि तेन परमानंदो बोधितः । नकेवलमुक्तप्रकारा रासक्रीडैव कृता । किंतु ता
निःसह विचित्रप्रकारेण विचित्रा रतिश्च कृतेत्याह । शरदिति । शरदि कामस्य प्राबल्येन पु
लिनादि चसौंदर्यपोषणं । यद्वा । हायनाख्यो शरत्समा इत्यमरोक्तेः संवत्सरोक्तेः संवत्सर
मध्ये यस्मिन्कृतौमासदिवसवाच्याः काव्येषुकथा निरूप्यंते ताः सिद्धेव तदर्थान्ताः सीत्यानु

श्री४ छितवानित्यर्थः। ताश्च श्रीगीतगोविंदविदग्धमाधवनाटकाद्युक्तप्रकाराज्ञेयाः। अन्य
136 त्रैर्व्याख्यातं। यद्वा एवं सिषेव इति। रात्रिषु रासक्रीडा उक्ताः। अधुनाकदाचिद्दिवसेष्वपि
ताहशीमन्यामपि क्रीडां सूचयति सर्वा इति। शरत्काव्यकथाश्च सर्वाः सिषेवे। तत्र का
व्यथाद्येन परमवैचित्री तासां सूचिता। ताश्च गीतगोविंदादिप्रसिद्धाः। तथा श्रीचंडीदा
सादिदर्शितदानखंडादिप्रकारकाश्च ज्ञेयाः। एवं प्रीतिविशेषेण श्रीबादरायणिना
वर्णितायाः श्रीरासक्रीडायाः श्रवणान्मिथोपांगकूणनेद्धिलोकनानामीक्षद्भुतं शु
ष्कतार्किकमीमांसकादीनां केषांचिद्वैष्णवानामपि प्रायं वितर्कःक्रिपयातेषामे १३६
वहितार्थं तमुत्थाप्य[illegible]व्याजेन पृच्छति। संस्थापनायेति त्रिभिः। सम्यक्स्थापनाय

प्र

लुप्तस्य कीर्त्तनाय वर्त्तमानस्य च विघ्नतो रक्षणायेत्यर्थः। न केवलं तदर्थमेव किं तु इतरस्य

अधर्मस्य प्रवृद्धस्य शमाय सर्वात्मनोन्मूलनाय। अन्यथा धर्मस्थापनस्याप्यसिद्धिः। सिद्धस्य

संरक्षणाय धर्मस्येत्यादि वचनेभ्यः भगवानिति। तत एव भगवद्वाच्यकत्वमपि स्यादिति भावः।

अंशेन श्रीबलदेवेन सह। इति तत्र तत्राग्रेऽपि दर्शितं। जगतामीश्वरः इति पालकः। अन्यथा

जगन्नाशापत्तिरित्यर्थः। श्लेषार्थश्चायं। धर्मस्य जाति विरुद्धाशेषधर्मस्य संस्थापनं नाशनं त

स्मै। प्रशमायार्थं तन्नाशाय। तादृशधर्माधर्मभावेनैव रासक्रीडादिमहालीलासिद्धा। निजावता

रमुख्यप्रयोजनसिद्धिः। ननु स्वकृतवेदादिनिबंधातिक्रमः अयं स्यात् तत्राह जगतां ब्रह्मादीनां

मपीश्वरः परमस्वतंत्रोऽयं। कदाचित्कार्यविशेषापेक्षया तादृशमपि कुर्यात् तत्र कस्यैको नाम

नियामकोऽस्त्वित्यर्थः। यद्वा। धर्मो मर्यादा स्थापना प्रात्यत्पादि निर्णायनमणि कल्पितोऽधर्मक्षयस्य तस्य

तदतिरिक्ताशेषस्य माहात्म्यादेरपि अन्यतापरमायेतज्जगत्परिपालकः विघ्नविनाशनपूर्वकं पालकः स

137

१३७

संम्यक्स्थापनेनैवसर्वेषांस्वतःसुखसर्वार्थसंपत्प्राज्यगत्पालनसिद्धेः। धर्माएवसेतवः।लोक
रक्षामर्यादाः। धर्मवैदिकनिबंधावातेषांवक्तृत्वादेवकर्त्ता। अन्यथावाक्यव्यवस्थायाविसं
वादेनलोकेव्यवस्थानस्यात्। किंच। आजितोरक्षितातत्प्रतिपक्षवधादिनावसुधासंवर्द्धनेनच
पालकः। परदाराभिमर्शनरूपंप्रतीपंधर्मसेतूनामेव। धर्मसंस्थापनादेर्वाप्रतिकूलंब्रह्मन्।
हेसाक्षाद्वेदमूर्त्ते। प्रतीपाचरणेनवेदातिक्रमाद्भवादृशांविप्रकुलातिक्रमोपिस्यात्। तच्चब्रह्मणएव
देवस्यतस्ययुक्तमेवेतिभावः। यद्वा। ननुताततत्कारणंकथंमयाज्ञातुंशक्यतमित्यर्थः। अत्रतं
व्याख्यातं। यद्वाप्रतीपमाचरदिति। अधर्मः। उक्तः। कृतोनिराकृतस्तस्यत्वर्थः। तत्र। उक्तं। मयापरोक्षं
जङ्गतानिरोक्षितमित्यादिना। कृतःसाक्षाद्देवरमणात्। अनिराकृतस्यपुनराचरणात्। तेनलोकेप्रव
त्तिसंज्ञावाञ्छेति। यद्वा। धर्मःअकर्षेणनाशितः। अधर्मस्यसम्यक्स्थापितइति। श्लेषपक्षे। कथंके
नप्रकारेणाचरन्। अपितुअनेकेनापीत्यर्थः। कुतः। नकिलदक्षेणधर्मसेतूनांवक्तृत्वादिहेतोरित्यर्थः।

श्री ४ अतोनिजावतारमुख्यप्रयोजनजन्मकिविशेषविस्ताराणां धर्माधनादरोयुक्तएवेतिभावः। सर्वना
वकर्माणिकुर्वीतेत्यादिवचनात्। तत्सेवकेष्वपियुक्तएव। यद्वा आत्मस्थधर्ममर्यादानांवक्रादिर
138 पिकिमर्थंप्रातिकूल्यमाचरत्। रासक्रीडयापरमजन्मकिप्रवर्तनेन। तदेकसाधकेधर्मस्यापिसाप
त्यार्थामितिभावः। किंच। पराणांतदेकलक्ष्याश्रेष्ठानांदाराणांस्वकीयाणांइवाभिमर्शनं। अमार्धम
वतीर्णस्यसर्वोपिरूपात्मप्रजनमनोरथपूरणंयुक्तमेवेति। यदुपतिधर्मपरयदुवंशे। तीर्णत्वादपि
तथाकर्तुंनार्हतीतिभावः। वेप्रसिद्धा। एतमितिकुत्राप्यन्यःसंशयोनास्तीत्यर्थः। नइतिवक्तृत्वंसंदे
हिवर्गाभिप्रायेण। संशयमिति। आप्तशिरोमुकुटमणेस्तस्यकृतेदोषबुद्धिर्नास्त्येव। किंतुशास्त्रविरु
द्धत्वेनतत्रास्माकंदार्ढ्याभावात्झटितिदोलनंस्यादित्यर्थः। सुव्रत। रेवलवर्णादिनिष्ठ। इतिभावाद्दश।
माचरितविरुद्धं। तत्जुगुप्सितमिवेति। यद्वा। हेसदाचारनिष्ठेति। अन्यथातवदारिसंमतसदा
चारलोपप्रसक्तिर्भावः। स्वपरूपप्रभूनांजन्मनांपतिरिति। जन्मवात्सल्येनधर्मातिक्रमाद्दोऽपिइल १३८
पि। जुगुप्सितंकिंकृतवान्। आपितुनैव। किंतुजन्मवर्गसंमतमेवाकरोदित्यर्थः। कुतः। आप्तः

लब्धःकामःरासक्रीडादिनानिजप्रेमलाक्षिविस्तारणमनोरथोयेनसः।सर्वसाध्यतमत्वेपिलाक्षिप्रवर्त्ति
नेनमिंदितानाचरणात्।अत्युत्तेनसाधुवर्गसंतोषणादेवेत्यर्थः।तथापिनःसंशये।आपदइतित तद२
द्वेषांचिकीर्षास्वार्थेलत्वविदांनाक्षिपराणांसाक्षिविक्रमांनांप्रेमलक्षिरसमयतदीयरासक्रीडादेसं
शयानावात्।यद्वा।आर्येनशनसमयेप्रसिन।इतिसंशयस्यायोगपताक्त्वा।अतःश्रीघ्रंतदूदनमाति
प्रेतं।नइतिस्वीयत्वेनविपक्षाणामपिग्रहणं।सद्विनयादिना।किंवावाक्चातुर्येणविपक्षतादिवि
धनार्थमेव।अतोदुर्बुद्धीनामेवाप्यात्मानंकेषांचित्।दितार्थमेवमप्यापृच्छन्।नवानिजसंदेहाद्वि
नावः।ततःअनिश्चयंयथास्यात्तेभ्योऽन्यसमक्षत्वात्तेषांसंशयशंखलौकिकधीत्यर्थः।सुवता
हिनलोकनिष्ठ।सहजकृपालुतयाशिष्यस्नेहापेक्षयावापरिहरतिधर्मेतिसप्तभिः।ईश्वराणांज्ञानेन
कोपसामर्थ्यवतांभगवद्गुणादिनाकर्मादिपारतंत्र्यरहितानामित्यर्थः।धर्मस्यव्यतिक्रमविशेषेण
लंघनं।यथाब्रह्मादीनांदुहितृकामनादि।साहसंनिर्लज्जता।यथाइंद्रादीनां।सर्वभुजोऽग्नेरह्यतिद
हतीतिवातथातस्य।सर्वभोजनेनापियथायोगरमेध्यादिग्रहणजन्यदोषावधादिदोषोवानस्यात्॥ ॥

श्री ४

139

तद्वदित्यर्थः। अन्ये त्वेवं व्याख्यातं। यद्वा धर्मव्यतिक्रमएवसाहसं। एतदीश्वराचरितं साहसं। नसम्यगाचरेत्। स
म्यगित्यस्य निषेधेनात्पर्यं कौतुकदाचिदपि। नत्ववनमनसापि। किन्तु तवचाचाकर्मणा [illegible] नैव निश्च
येव। विशेषणसमूलतया लोकद्वयदुःखित्वादिप्रकारेणनश्यति। मौढ्यात्। ईश्वराणामैश्वर्यमात्म
नश्चासामर्थ्यमज्ञात्वेत्यर्थः। इतिलक्षणमौढ्यमेव। रुद्रुरूकः। अन्यथालक्षणाज्ञाप्तिः। अद्धिः कं काल
कूटं। इतिपरमतैर्मणतयासद्यएवविनाशोनिश्चेतः। ईश्वरस्तुननश्यदेव। प्रस्तुतऐश्वर्यविशेषप्रकाशादिना
शान्तएव। यथानीलकंठत्वादिनाश्रीमहादेवइतिभावः। स्वकीयेनवचसायुक्तमितिस्वशब्देनवच
सावित्क्षेमपरस्वशपेनाविचारादुच्यमानमात्रेविसंवादिवचोव्यवहितिं। बुद्धिमानितितत्सद्धिकार्थत्व
थः। अन्यथानिर्बुद्धिरेवेतिभावः। कुशलं पुण्यं। तस्याचरितेनानुष्ठानेन एषामीश्वराणां। चकाराद्धु
वापिअर्थः फलं। विपर्ययेणपापेनवाशब्दः समुच्चये। अनर्थोपिनास्ति। कुतः। निरहंकारिणां। अहं
कारस्याव्यतिरिक्तानां अहंकाराभावेनकर्मनिर्लेपादित्यर्थः। प्रभो। हे वोढुंसमर्थ। एतत्त्वयास १३९
म्यग्बुध्यतएवेत्यर्थः। यद्वा। तस्यापीश्वरत्वात्तिबोधयेणसंबोधयति। हे ईश्वरेति। अस्तोपद्येवंतेषामपिन

यतो

रंकारीर्तमार्गेएवानर्थीभावस्तादिसर्वजीवहितार्थमवतीर्णस्यपरमेश्वरस्यकुतोर्थिशंकापीति
केषुतिकन्याजेनजन्मनत्वाद् इतिचिबुल इति।अखिलसत्वानांसर्वजीवानांतिर्यगाद्यपेक्रमेणतामस
राजससात्विकाः।ईशितव्यानांस्वभावतएवनियम्यानां।इतिमुक्तानामपितदधीनतासूचिता।कु
शलाकुशलेपुण्यपापेतामामन्यपःसंपर्कःसर्वनियंतृत्वेननियामकत्वाभावात्।परमस्वतंत्रोऽपिस्वए त्वा ४
नदेवादिपरमेश्वरत्वंनामेतिभावः।अन्यत्तैर्व्याख्यातंभ्यम्न।ईशितव्यानांचलजन्मनांकिमुतेति।परा
गतिःअतिनम्रत्वेनसेवयाजनितविशेषोदर्शितः।नितरांसेवेतितिनिशब्दः।स्वभावतएवतेषांसेवासत्त्वानि
प्रायेण।यद्वा।परागतिदूरसेवानिष्ठता।निशब्देनवस्वल्पमात्रसेवानिर्दिष्टा।तथापितन्माहात्म्येनदृष्टाः
निर्भयत्वादिदर्पयुक्ताः।अतएवस्वैरंचरंति।विधिनिषेधानादरेणस्वच्छंदेवकृत्यानिकुर्वंति।अतोनतन्न
मानाःतेरवध्यमानाःतत्रानानामकेः।तस्मात्इतिपाठेसर्वत्रसंतुष्टाः।अनन्यापेक्षाइत्यर्थः।किंच।योगि
संगःसमाधिर्ज्ञानंवातस्यप्रभावेनशक्त्या।विशेषेणधुतःच्छिन्नःकर्मनिरंतनकोटिजन्मार्जितैर्बंधःबं

श्री४

140

धनंतद्रूपावाप्तंध्येयेस्तिमुनयोपिअपिशब्देननक्तंत्यामुनीनांन्यूनतोक्ता।अनेनैवश्रेष्ठ्यानिध्यायेण
दृष्टाद्युक्तं।इष्टरूपास्यचक्षुर्देनैव।आतंत्रकटितेवपुर्येनतस्येतिपरमस्यात्तत्त्वंदर्शितं।यद्वानिज
प्रेमजनितविस्तारेणेष्टरूपात्तत्स्वतद्वेदरूपाविधिनिषेधानादरोपुक्तएवेतिभावः।यद्वाजक्तानां
इष्टरूपात्प्राप्तानिवपूर्वंषिमत्स्यकूर्मादिमूर्तयोयेनेतिअवतारित्वेनपरमैश्वर्यमुक्तं।अतःकृतएवं
धः।अपिलुनकथमपिस्यादित्यर्थः।अन्यत्तैर्व्याख्यातं।यद्वा।योगात्मकोयोगः।मुनयोपिकिंमुतप्रय
मतएवजनितसंमतइत्यर्थः।अप्यर्थेचकारः।किंवक्तव्यंहृद्यत्वेनतेषांतासांचेति।सर्वेषामपितत्रसं
शयनिरासार्थमेवशब्दः।सइत्यनेनास्यान्वयः।सएवेषसाक्षाद्भूतः।अथ[illegible]तिलंदरात्वेननत्वे
येत्वेनवा।तत्त्वविचारतस्तास्मिन्नेवबोधरूत्वपर्यवसानात्।किंवात्रअंतर्यामित्वेनापिभाजावा। १४०
दिनामद्वैतव्याख्यानुसारेण।वपरदारत्वाभावात्।परदारसेवानास्तीतिपरिहृतं।अतएवपरम

स्मत्वासिद्धेसर्वेषामित्युक्तं।एषःश्रीगोपीरमणःक्रीडनेनलीलया।किंवाक्रीडनेनकेलुनाक्रीडार्थमि
त्यर्थःश्रदेहस्नाकृतिरूपश्रीमूर्त्तिप्रकटकः।अन्यत्तैर्व्याख्यातं।यद्वा।अध्यक्षःसर्वचित्ताधिष्ठाता
सर्वेंद्रियप्रवर्त्तकश्चेत्यर्थः।अतएवांतश्चरति।एवमंतर्यामितयासर्वकर्मसुसर्वप्रवर्त्तनेनापिच
यातत्स्यतत्कृतगुणदोषैर्लेपोनास्यात्।किंवासर्वकर्मसुअंतर्यामिद्रष्टृत्वेनरन्येषामपितैर्लेपो
यथानस्यात्तथात्रापीतिभावः।इतिपरमेष्ठ्येणपूर्वोक्तगुणधानावहेतुरस्तिव्यक्तितः।विशेष
नश्चरासक्रीडार्थमेवदेहस्नाकृप्रकटितलक्ष्मणपश्रीवृंदाकिशोरमूर्त्तिरित्यर्थः।प्रेमरसवि
स्तारणार्थमवतीर्णस्यतदनुरूपएवव्यवहारोयुक्तोनामेतिसिद्धांततत्वं।एतदेवप्रपंचयिष्य
ति।अनुग्रहायइति।यद्वा।अध्यक्षःप्रत्यक्षःसन्क्रीडनायततक्रीडार्थंदेहःअवतारोपि
गोपीजनानांवल्लवजनानांबालानाज्ञातिरमयतीतितथासः।अतस्तेषामंतर्बहिश्चततक्रीडा

श्री1 साधनत्वान्नतस्य क्रीडयाकस्यापि कोपि दोषः प्रसक्तो दितिभावः भक्तानामनुग्रहाय
मङ्गलानां विनोदार्थं करोमि विविधाः कृपाद्युत्पादिश्रीनाथवद्वचनात् । मानुषं नराकारं । आश्रि
तः प्रकटितवानस्मि । यद्वा प्रकटम्भासेति वाक्यसमाप्तिः । इति भक्तानुग्रहार्थं तत्क्रीडितमि
१५१ ष्टं । तत्र भक्तशब्देन श्रीव्रजदेव्यो वृन्दजनाश्च सर्वे । तथा कालत्रयस्थं वंशिनो अन्ये चैवैष्णवाः
यद्वा भक्तानां मुख्याः श्रीव्रजदेव्य एवोक्ताः । तथापि मुख्यानामनुग्रहेणान्येषामपि सर्वेषामनु
ग्रहः सिद्ध एव । अत एव क्रीडा न जातवीत्या संपादयतीत्यर्थः । श्लेषणात्तजात । अनुसरति प्रक
शयति वा तिक्रीडानां नित्यसिद्धत्वं सूचितं । तेन सर्वदोषः स्वत एव निरस्तः । तादृशीः अनिर्वच
नीयाः सर्वचित्ताकर्षिणी रित्यर्थः । श्लेषेण राजस्य दृश्या क्रीडा श्रवणेनापि तत्परो भवेत् । किंमुत
रासक्रीडायां स्वेत्यर्थः । तत्स्वेन भगवान् क्रीडा वा सर्वोपि जनो भवेत् । यद्वा मानुषं देहमाश्रि १५१
तः सर्वोपि जीवः तत्परो भवेत् । मर्त्यलोके श्रीभगवद् अवतारास्तथा भजने मुख्य चाद्य मनुष्या

णामेव सुखं तच्छ्रवणादिसिद्धेः । कृतानामिति पाठे सर्वेषामेव जनानां विषयिणां मुमुक्षूणां मु
क्तानां भक्तानां चेत्यर्थः । इति परमकारुण्यमुक्तं । एवं स कथं धर्मसेतूनामित्यनेन धर्मविरुद्धं क
थं कृतवानित्येकस्य प्रश्नस्य परिहारः । धर्मव्यतिक्रम इत्यादिना । तथाप्याप्तकाम इत्यनेन परि
हृतस्य कालत्रयस्येति द्वितीयस्य अनुग्रहायेत्यनेनेति विवेचनीयं । तासु तन्निवारणमति
क्रम्य गतास्वपि कृष्णं प्रत्यसूयां न चक्रुः । कुतः स्वस्य मायया शक्तिविशेषेण मोहिताः । यता
व्रजौकसः तल्लीलापरिकरा इत्यर्थः । अत एव गतानपि तान् स्वस्वपार्श्वस्थानेव मन्यमाना व
व्रजुः । यद्वा दारान्प्रति नासूयन् । कुतः स्वपार्श्वस्थान्मन्यमानाः । तत्र च तावार्यमाणा इत्य
नेन निजवाक्यमतिक्रम्य साक्षात्कृतानामपि तासां तैः स्वपार्श्वस्थत्वमननं पुनर्निर्हेत्यागम
नसाधनता दिति ज्ञेयं । यद्वा भक्तानामनुग्रहायेत्युक्तं । तत्र गोपानां दाराकर्षणेन तस्मै
तेषामसूयासत्त्वात्तेषु कथमनुग्रहः सिद्ध्येदित्याशंक्य लच्चालौरं वदन्नुस्त तच्चानुसर

तिनति । अर्थः सएव वासुदेवेन वित्ता धिष्ठात्रा तेनैव अनुमोदिता अतः प्रेरिता अपि । यद्वा वसु
पुत्रस्तासु दीव्यतीति वसुदेवो वसुत्रवराद्रोणरूपः श्रीनंदएव । तत्पुत्रो वासुदेवस्तेन भगवता
प्रकटनपरत्वा श्रीकृष्णेन व्रजमंगलार्थमनुज्ञाताः । किंवा अनुनिरंतरं मोदिता हर्षिताः । अत
एवानिवृत्ताः तथापि स्वगृहान्ययुः । कुतः भगवत्प्रियाः तत्प्रीतिमालोच्येत्यर्थः । अन्य
थातातमाद्वयस्यवर्गसिंताव्रणगोपालनादेस्तथाप्यर्व्वव्रजासक्रीडासुखस्यासंपत्तिः ।
व्रजेयावद्भुः नवोढा इव नवयुवतयः । यद्वा रासक्रीड्यो तत्पत्नीत्वमिव ज्ञात्वा स्वगतिः । इ
दं रासक्रीडालक्षणं विशिष्टं क्रीडितं । चकारादीदृशमन्यदपि । विष्णोरिति तासां मध्ये द्व
याद्वयोरित्य युक्तवा पक्वचालिस्रायया । श्रद्धान्वितश्चेति । अन्यथा रसानुदयेन परम
नन्त्यसंपत्तेः । श्रद्धान्वितत्वादेव । अनु निरंतरं शृणुयात् । एतच्चतत्रैव । यद्वा अनु निश्चितं १४२
अपश्रवणानंतरं श्रवणान्वितत्वात् । किंवा ऽनुक्तसमुच्चये स्मरेच्च । प्रत्येकं सर्वेषां पर

श्री०

भक्तिसाधनत्वात् । तथापि श्रवणादित्रयस्यास्य यथोत्तरं तत्र श्रैष्ठ्यं । य इत्यधिकारित्वोपलक्षणा
निरस्ता । परां परमां प्रेमलक्षणां प्रतिक्षणं नूतनत्वेन लब्ध्वा । हृद्रोगरूपं काममिति लिङ्गवद्विषय
कः कामविशेषो व्यवच्छिन्नः । तस्य परमामृतत्वेन तद्विपरीतत्वात् । धीरः सर्वार्थतत्त्ववेत्ता । अपुनः का
मादि [illegible] हुलितचित्तो वा । हृद्रोगत्यागादिकमेतत्परमभक्तेरेवानुषंगिकं फलं । तस्या एव मुख्यफ
लत्वात् । तत्क्रीडाश्रवणादिनाप्येतत्स्यात् । किं वक्तव्यं नौतिकनिंद्यकामक्रीडावत् । तस्य सा
क्रीडेति प्रसंगानुसारेण तात्पर्यं कल्प्यं । अतस्तस्य तासां च सकामविशेषः प्रेमपरिपाकविलासविशे
षरूप एव । इति लिखितमेव विवृतं च श्रीभागवतामृते । अन्यत्र व्याख्यातं । यद्वा धीरः विचारयन्
भ्रमरीयं० सन्नितपूर्णः । कामं यथेष्टमाशु मनस्थिं प्रतिलभ्य हृद्रोगमाधिं श्रीकृष्णाप्राप्त्यादिकृतमचिरेणाप
हिनोति । तत्त्यागे रतिभावः । अन्यत्समानं । क्रीडतावपि रंतस्त्वजडोऽयं येन ... ते । तस्यैवैतन्मा १४२
रूपस्य प्रीतये भगवता स्विदं ॥ ॥ इति श्रीदशमे त्रयस्त्रिंशः ॥ ॥ श्रीगोपीजनवल्लभाय नमः ॥

इति पंचाध्यायी ॥

नं० १००४-ध

पंचाध्यायी

१४३